# सुभाषित व्याकरण - ३३

## Subhāṣita Vyākaraṇa - 33

**(A compilation of Saṃskṛta well said verses with full grammar and meaning)**

**Compiler: Kishore Nayak**
**Editor: Padmakar Gangatirkar**

शुक्रवार, वैशाख शुक्ल तृतीया १९४६, शोभकृत संवस्तर

**किं जातैर्बहुभिः पुत्रैः शोकसन्तापकारकैः ।**
**वरमेकः कुलालम्बी यत्र विश्राम्यते कुलम्** ॥२१६॥ - चाणक्यनीतिदर्पण अ. ३ श्लो. १७

बहुभिः शोकसन्तापकारकैः पुत्रैः जातैः किम् (प्रयोजनम् अस्ति)? एकः कुलालम्बी (पुत्रः), यत्र कुलम् विश्राम्यते, वरम् (भवति)॥

What is the purpose many sons who cause only sorrow and suffering? One single son, on whom the family can depend and with whom it can settle down is much preferred.

बहुभिः, शोकसन्तापकारकैः, पुत्रैः, जातैः- all in पु. लि. तृ. वि. ब. व. of बहु- adjctv- many, very much, large number, शोकसन्तापकारकः- one that creates sorrow and torture- शोकः- sorrow, distress, anguish, सन्तापः- torture, torment, suffering, कारकः- adjctv- producing, generating, doing- शोकः च सन्तापः च- शोकसन्तापः- द्वंद स. & शोकसन्तापस्य कारकः- शोकसन्तापकारकः- ष. तत्पुरुष स., पुत्रः- son, child, जातः- born, one who has taken birth- जात- क. भू. धा. वि. of जन्- जायते ४ ग. आ. प. to be born, produced, एकः- one, single & कुलालम्बी- one who is maintaining the family, family-supporting- both in , कुलम्- race, family, आलम्बिन्- one who is maintaining, one who is dependable- कुलम् आलम्बते यस्मिन् सः- कुलालम्बिन्- बहुव्रीहि स.-both in पु. लि. प्र. वि. ए. व., विश्राम्यते- आ. प. वर्त. प्र. पु. ए. व. of वि+ श्रम्- to settle down, repose, take rest- (श्रम्- श्राम्यति ४ ग. प. प. to exert, take pains, toil, वरम्- preferred, excels, the best, यत्र- in which case or place, where & किम्- a particle of interrogation: what, which- all अव्ययs

**कुग्रामवासः कुलहीनसेवा कुभोजनं क्रोधमुखी च भार्या।**
**पुत्रश्च मूर्खो विधवा च कन्या विनाग्निमेते प्रदहन्ति कायम्**॥२१७॥ -चाणक्यनीतिदर्पण अ. ४ श्लो. ८
पाभे: विनाग्निमेते = विनाग्निना षट्

कुग्रामवासः, कुलहीनसेवा, कुभोजनम्, क्रोधमुखी च भार्या, पुत्रः च मूर्खः, विधवा च कन्या, एते विना अग्निम् (षट् विना अग्निना) कायम् प्रदहन्ति॥

The following six scorch the body without actual fire - Living in a bad village, serving a family with bad reputation, eating bad food, a wife (or husband !) with an angry speech, a stupid son and a windowed daughter.

कुग्रामवासः- stay in a wretched village- कु- अव्यय- prefix implies: bad, deficiency, littleness, ग्रामः- village, कुग्रामः- a stay, residence- कुत्सितः ग्रामः- कुग्रामः- प्रादि कर्मधारय स. & कुग्रामे वासः- कुग्रामवासः- स. तत्पुरुष स., पुत्रः- son, child, मूर्खः- stupid, foolish- all in पु. लिं. प्र. वि. ए. व., कुलहीनसेवा- serving a family with low background- कुलम्- family, हीन- mean, low, devoid of, defective, सेवा- service, attendance- हीनम् कुलम् यस्य सः- कुलहीनः- बहुव्रीहि स. & कुलहीनस्य सेवा- ष. तत्पुरुष स., क्रोधमुखी- a woman with a angry face- क्रोधम्- anger, मुखम्- face, head, क्रोधम् मुखे यस्याः सा- क्रोधमुखी- बहुव्रीहि स., भार्या- wife, विधवा- a widow- वि- अव्यय- as a prefix it expresses separation, disjunction, धवः- a husband, man- विगतः धवः यस्याः सा- बहुव्रीहि स., कन्या- daughter, girl- all in स्त्री. लिं. प्र. वि. ए. व., कुभोजनम्- a hopeless meal, bad lunch- भोजनम्- a meal, lunch, food- कुत्सितम् भोजनम्- प्रादि कर्मधारय स.- in न. लिं. प्र. वि. ए. व., एते (एतद्) & षट्- both in पु. लिं. प्र. वि.

ब. व., अग्निम् & कायम्- both in पु. लिं. द्वि. वि. ए. व. of अग्निः- fire & कायः- the body, अग्निना- in पु. लिं. तृ. वि. ए. व. of अग्निः- fire, प्रदहन्ति- वर्त. प्र. पु. ब. व. of प्र+ दह्- scorch, torment- (दह्- दहति १ ग. प. प. to burn), च-and & विना- without, devoid of- both अव्ययs

**एकाकिना तपो द्वाभ्यां पठनं गायनं त्रिभिः।**
**चतुर्भिर्गमनं क्षेत्रं पञ्चभिर्बहुभिर्रणम्** ॥२१८॥ -चाणक्यनीतिदर्पण अ. ४ श्लो. १२

एकाकिना तपः, द्वाभ्याम् पठनम्, त्रिभिः गायनम्, चतुर्भिः गमनम्, पञ्चभिः क्षेत्रम् (तथा) बहुभिः रणम् (क्रियते)॥

Austerity is pursued by a single person. Readings are done by two students together. A song is sung by three artists. A (group) travel is done by four. Land is cultivated by five farmers. A war is fought by a large number of warriors.

एकाकिना- in पु. लिं. तृ. वि. ए. व. of एकाकिन्- alone, solitary, तपः, द्वाभ्याम्- in पु. लिं. तृ. वि. द्वि. व. of द्वौ, त्रिभिः, चतुर्भिः, पञ्चभिः & बहुभिः- all in पु. लिं. तृ. वि. ब. व. of त्रयः- three, चत्वारः- four, पञ्च- five & बहु- adjctv- many, large, much more, पठनम्- studying, reading, reciting, rehearsing- (पठ्- पठति १ ग. प. प. to study, read), गायनम्- singing-(गै- गायति १ ग. प. प. to sing), गमनम्- traveling, going- (गम्- गच्छति १ ग. प. प. to go), क्षेत्रम्- field, ground, land), रणम्- war, battle- all in न. लिं. प्र. वि. ए. व.

**आलस्योपहता विद्या परहस्तं गतं धनम्।**
**अल्पबीजं हतं क्षेत्रं हतं सैन्यमनायकम्** ॥२१९॥ -चाणक्यनीतिदर्पण अ. ५ श्लो. ७

पाभे: परहस्तं गतं धनम्= परहस्तगताः स्त्रियः

आलस्योपहता विद्या (हता भवति) । परहस्तम् गतम् धनम् (हतम् भवति) ।/परहस्तगताः स्त्रियः (हताः भवन्ति), अल्पबीजम् हतम् क्षेत्रम् (तथा) अनायकम् सैन्यम् हतम् (भवति)॥

Knowledge is lost by laziness. Wealth, gone into hands of others (stolen) is lost. ( Similarly), women that are in custody of others, a field that is sowed with scanty seeds and an army that has no leader are all sure to get destroyed.

आलस्योपहता- आलस्य- laziness, उपहता- struck & विद्या- knowledge, expertise, skill, learning- आलस्येण उपहता- तृ. तत्पुरुष स.- both in स्त्री. लिं. प्र. वि. ए. व., परहस्तम्- hands of others- परः- the other, हस्तम्- hand- परस्य हस्तम्- ष. तत्पुरुष स., गतम्- gone, reached- गत- क.भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go, धनम्- wealth, money, अल्पबीजम्- very little seeds- अल्प- adjctv- scanty, trickling, unimportant, बीजम्- seed- अल्पम् बीजम्- वि. पू. प. कर्मधारय स., हतम्- struck, destroyed, ruined- हत- क.भू. धा. वि. of हन्- हन्ति २ ग. प. प. to strike, kill, क्षेत्रम्- field, ground, अनायकम्- one that is without a leader- नायकः- leader, conductor, guide- न नायकः यस्य तद्- अनायकम्- नञ्बहुव्रीहि स., सैन्यम्- army, fighting forces- all in न. लिं. प्र. वि. ए. व., परहस्तगताः & स्त्रियः- both in स्त्री. लिं. प्र. वि. ब. व. of परहस्तगता- adjct- see above & स्त्री- woman, wife

**भीतो वाडववासतो जलनिधौ शम्भोः शिरःस्वीकृतं**
**तत्र त्र्यम्बकमौलिवासुकिविषज्वालावलीत्रासितः।**
**तस्माल्लोकमगाद्दिवं निपतितस्तत्रैव राहोर्मुखं**
**प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः** ॥२२०॥- सुभाषितरत्नभाण्डागारम्, वैदिकवाङ्मयम्

जलनिधौ वाडववासतः भीतः, (चन्द्रेण) शम्भोः शिरः स्वीकृतम्। तत्र (सः) त्र्यम्बक-मौलि-वासुकि-विष-ज्वालावली-त्रासितः। तस्मात् (सः) दिवम् लोकम् अगात्, तत्र एव (सः) राहोः मुखम् निपतितः। प्रायः यत्र भाग्यरहितः गच्छति, तत्र एव आपदः यान्ति ॥

Afraid of presence of the submarine fire in the ocean, the Moon opted to move on to the head of Lord Shiva. There, because he was tormented by the series of poisonous blazes of King of snakes, Vasuki, on the head of Shiva, he went on to the heavenly abode (sky). Even there also he fell into the month of demon Rahu (during periodic eclipses). Probably wherever an unfortunate person goes, the calamities catch up with him.

जलनिधिः- in पु. लिं. स. वि. ए. व. of जलनिधिः- ocean, sea- जलम्- water, निधिः- treasure trove- जलस्य निधिः- ष. तत्पुरुष स., वाडववासतः- by the presence of the submarine fire- वाडवः- submarine fire, वासः- habitation, situation, वाडवस्य वासः- ष. तत्पुरुष स., तः (तस्)- suffix implies: by, from, (like पं. वि.)- भीतः- afraid, frightened- भीत- क. भू. धा. वि. of भी- बिभेति ३ ग. प. प. to fear, dread, त्र्यम्बकमौलिवासुकिविषज्वालावलीत्रासितः- tormented by the series of poisonous blazes of King of snakes, Vasuki on the head of Shiva- त्र्यम्बकः- Shiva- अम्बकम्- an eye- त्रीणि अम्बकानि यस्य सः- बहुव्रीहि स., मौलिः- head, वासुकिः- name of King of snakes, विषम्- poison, ज्वाला- a blaze, flame, आवली- range, series, त्रासितः- tormented, terrified- त्रासित- क. भू. धा. वि. of प्रयोजक of त्रस्- त्रासयति-ते- (त्रस्- त्रसति, त्रस्यति १, ४ ग. प. प. to tremble, fear)- त्र्यम्बकस्य मौलेः वासुकेः विषस्य ज्वालायाः आवल्याः त्रासितः- ष. तत्पुरुष, स., निपतितः- fallen, thrown in- निपतित- क. भू. धा. वि. of नि+ पत्- to descend, fall- (पत्- पतति १ ग. प. प. to fall, fall down) & भाग्यरहितः- one who is devoid of any luck, unfortunate person- भाग्यम्- fortune, luck, रहितः- one who is devoid of, deprived of- रहित- क. भू. धा. वि. of रह्- रहति १ ग. प. प. to leave, quit)- all in पु. लिं. प्र. वि. ए. व., शम्भोः & राहोः- both in पु. लिं. ष. वि. ए. व. of -शम्भुः- Shiva & राहुः- name of a demon supposed to cause eclipse of the sun & the moon, शिरः (शिरस्)-head & स्वीकृतम्- accepted, took refuge- स्वीकृत- क. भू. धा. वि. of स्वीकृ- (कृ-करोति कुरुते ८ ग. उ. प. to do), लोकम्- world, दिवम्- the sky, heaven & मुखम्- mouth- all in न. लिं. द्वि. वि. ए. व., गच्छति- वर्त. प्र. पु. ए. व. of गम्- गच्छति १ ग. प. प. to go, to undergo & अगात्- सा. (तृ) भूत प्र. पु. ए. व. of गम्- गच्छति, यान्ति- वर्त. प्र. पु. ब. व. of या- याति २ ग. प. प. to go, arrive, invade आपदः- in स्त्री. लिं. प्र. वि. ब. व. of आपद्- calamity, misfortune, तत्र- there, in that place, यत्र- where, in which place, तस्मात्- therefore, एव- just, merely, only, प्रायः (प्रायस्,)- probably, mostly, generally- all अव्ययs

**अन्यथा वेदपाण्डित्यं शास्त्रमाचारमन्यथा।**
**अन्यथा कुवचः शान्तं लोकाः क्लिश्यन्ति चान्यथा** ॥२२१॥ -चाणक्यनीतिदर्पण अ. ५ श्लो. १०

लोकाः वेदपाण्डित्यम् अन्यथा, शास्त्रम् आचारम् अन्यथा, शान्तम् कुवचः अन्यथा, च अन्यथा क्लिश्यन्ति (क्लिश्नन्ति)॥

People, who criticise wisdom of Vedas, criticise sacred texts and (Hindu) way of life and speak badly of a peaceful man, only torment themselves unnecessarily.

वेदपाण्डित्यम्- profound knowledge of Vedas- वेदः- Veda- sacred knowledge, scripture, पाण्डित्यम्- scholarship, profound knowledge- वेदेषु पाण्डित्यम्- स. तत्पुरुष स. & शास्त्रम्- religious or sacred treatise, scripture- both in न. लिं. द्वि. वि. ए. व., कुवचः- in न. लिं. पं. वि. ए. व. of कुवचस्- hurting words- कु- अव्यय- a prefix implies: bad, wicked, harsh, वचस्- speech, words- कुत्सितम् वचः- कुवचः- प्रादि  कर्मधारय स., शान्तम् & आचारम्- both in पु. लिं. द्वि. वि. ए. व. of शान्तः- one who has subdued his passions, an ascetic, one who has achieved tranquility- शान्त- क. भू. धा. वि. of शम्- शाम्यति ४ ग. प. प. to be calm, tranquil & आचारः- conduct, traditional behaviour, custom, लोकाः- in न. लिं. प्र. वि. ब. व. of लोकः- people, person, क्लिश्यन्ति- वर्त. प्र. पु. ब. व. of क्लिश्- क्लिश्यति ४ ग. प. प. to be hurt, suffer- (normally क्लिश्- क्लिश्यते ४ ग. आ. प.), च-and, अन्यथा- falsely, otherwise- both अव्ययs

**दारिद्र्यनाशनं दानं शीलं दुर्गतिनाशनम्।**
**अज्ञाननाशिनी प्रज्ञा भावना भयनाशिनी** ॥२२२॥ -चाणक्यनीतिदर्पण अ. ५ श्लो. ११

दानम् दारिद्र्यनाशनम् (अस्ति), शीलम् दुर्गतिनाशनम्  (अस्ति), प्रज्ञा अज्ञाननाशिनी (भवति। तथा) भावना भयनाशिनी (अस्ति)॥

Donation (of wealth) removes poverty. A moral conduct avoids any misdeeds. Knowledge removes ignorance and faith removes any fear.

दानम्- charity, donation, giving away, शीलम्- character, good behaviour, दारिद्र्यनाशनम्- one that eradicates poverty- दारिद्र्य- poverty, नाशनम्- destroying, removing- (नश्- नश्यति४ ग. प. प. to be destroy, to be lost)- दारिद्र्यम् नाशनम् & दुर्गतिनाशनम्- one that eradicates गतिः- situation, condition, going- दुरिता गतिः- दुर्गतिः- misfortune, calamity- प्रादि कर्मधारयस. & दुर्गतिम् नाशनम् - दुर्गतिनाशनम्- कर्मधारय स.- all in न. लिं. प्र. वि. ए. व., प्रज्ञा- intelligence, wisdom, discrimination, भावना- conception, faith, contemplation, hypothesis, ज्ञानम्- knowledge, understanding- न ज्ञानम्- अज्ञानम्- नञ्तत्पुरुष स.- ignorance- अज्ञानम् नाशिनी - अज्ञाननाशिनी- one that eradicates ignorance & भयनाशिनी- one that eradicates fear- भयम्- fear, dread, threat, भयम् नाशिनी - both द्वि. तत्पु.  स.- all in स्त्री. लिं. प्र. वि. ए. व.

**नास्ति कामसमो व्याधिर्नास्ति मोहसमो रिपुः।**
**नास्ति कोपसमो वह्निर्नास्ति ज्ञानात्परं सुखम्** ॥२२३॥ -चाणक्यनीतिदर्पण अ. ५ श्लो. १२

कामसमः व्याधिः न अस्ति, मोहसमः रिपुः न अस्ति, कोपसमः वह्निः न अस्ति (तथा) ज्ञानात् परम् सुखम् न अस्ति॥
There is no disease like (excessive) desires. There is no adversary comparable to infatuation (about something). There is no fire equivalent to anger. There is no greater happiness than (acquiring) knowledge.

व्याधिः- ailment, sickness, disease, रिपुः- enemy, adversary, वह्निः- fire, कामसमः- comparable to sensual enjoyment- कामः- desire, sensual enjoyment, सम- adjctv- like, similar to, comparable to- कामस्य समः, मोहसमः- comparable to delusion- मोहः- infatuation, affliction, delusion- मोहस्य समः, कोपसमः- comparable to anger- कोपः- anger, wrath- कोपस्य समः- all three ष. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, ज्ञानात्- in न. लिं. पं. वि. ए. व. of ज्ञानम्- knowledge, understanding, proficiency, परम्- adjctv- beyond, further, other than & सुखम्- joy, happiness, satisfaction- both in न. लिं. प्र. वि. ए. व., न- no, not- अव्यय

**जन्ममृत्युं हि यात्येको भुनक्त्येकः शुभाऽशुभम् ।**
**नरकेषु पतत्येक एको याति परां गतिम्** ॥२२४॥ -चाणक्यनीतिदर्पण अ. ५ श्लो. १२

एकः जन्ममृत्युम् हि याति, एकः शुभाऽशुभम् भुनक्ति, एकः नरकेषु पतति (तथा) एकः पराम् गतिम् याति॥

An individual is born alone and dies alone. He/She alone enjoys good and bad. He / she alone falls into hell or goes to Supreme abode.

*All are consequences' of his/her actions and karma.*

एकः- one, single, an individual- in पु. लि. प्र. वि. ए. व., जन्ममृत्युम् & शुभाऽशुभम्- both in पु/न. लि. द्वि. वि. ए. व. जन्ममृत्युः- life and death- जन्मन्- न. लिं- birth, life, मृत्युः- death- जन्म च मृत्युः च- जन्ममृत्युः & शुभाऽशुभः/भम्- good and bad, auspicious and inauspicious- शुभ- adjctv- auspicious, splendid, good- न शुभः- अशुभः- नञ् तत्पुरुष स., शुभः च अशुभः च- शुभाऽशुभः- both द्वंद स., नरकेषु- in पु/न. लि. स. वि. ब. व. of नरकः/कम्- hell, याति, भुनक्ति & पतति- वर्त. प्र. पु. ए. व. of या- २ ग. प. प. to go, to come to, to arrive, march towards, भुज्- भुनक्ति भुङ्क्ते ७ ग. उ. प. to eat, enjoy, experience, endure, suffer & पत्- १ ग. प. प. प. to fall, drop down, पराम् & गतिम्- both in स्त्री. लि. द्वि. वि. ए. व. of परा- highest, greatest, ultimate, final & गतिः- state, destination, movement, हि- indeed, surely, certainly- अव्यय

**विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषु च ।**
**व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्य च** ॥२२५॥ -चाणक्यनीतिदर्पण अ. ५ श्लो. १५

(मनुष्यस्य) प्रवासेषु विद्या मित्रम् (भवति), गृहेषु च भार्या मित्रम् (भवति), व्याधितस्य औषधम् मित्रम् (भवति, तथा) मृतस्य धर्मः मित्रम् च (भवति) ॥

One's knowledge is his friend during travels and his wife is his friend at homes. Medicine is his friend in his sickness and Dharma his companion after death.

प्रवासेषु & गृहेषु- both in स. वि. ब. व. of प्रवासः- पु. लिं- journey, travel & गृहम्- न. लिं- house, home, dwelling, विद्या- knowledge, expertise, learning & भार्या- wife- both in स्त्री. लिं. प्र. वि. ए. व., मित्रम्- a friend, an ally & औषधम्- medicine- both in न. लिं. प्र. वि. ए. व., व्याधितस्य & मृतस्य- both in पु. लिं. ष. वि. ए. व. of व्याधितः- diseased, sick- an adjctv- (व्याधिः- sickness, ailment) & मृतः- a dead person,

deceased- मृत- क. भू. धा. वि. of मृ- म्रियते ६ ग. आ. प. to die, perish, धर्मः- prescribed codes of conduct, Dharma- in पु. लिं. प्र. वि. ए. व., च- and-अव्यय

**नास्ति मेघसमं तोयं नास्ति चात्मसमं बलम्।**
**नास्ति चक्षुःसमं तेजो नास्ति चान्नसमं प्रियम्**॥२२६॥ -चाणक्यनीतिदर्पण अ. ५ श्लो. १७

मेघसमम् तोयम् न अस्ति, आत्मसमम् बलम् च न अस्ति, चक्षुःसमम् तेजः न अस्ति (तथा) अन्नसमम् प्रियम् च न अस्ति॥

No other water is comparable to that from the clouds. One's own strength is the better than that of others. No brilliance is better that of the eyes and there is nothing beloved more than the food.

समम्- comparable to cloud, आत्मसमम्- like one's own, चक्षुःसमम्- like that of eyesight, अन्नसमम् - matching the importance of food- मेघः- पु. लिं- cloud, आत्मन्- पु. लिं- self, one's own, चक्षुः (चक्षुस्)- न. लिं- an eye, अन्नम्- food, rice/ धान्यम्- grain- मेघस्य समम्, आत्मनः समम्, चक्षुसः समम्-, अन्नस्य समम् /धान्यस्य समम्- ष. तत्पुरुष स., तोयम्- water, बलम्- strength, power, ability, तेजः (तेजस्)- sharpness, brilliance, light, प्रियम्- dear one, beloved, welcome, अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, च-and & न- no, not- both अव्ययs

**अधना धनमिच्छन्ति वाचं चैव चतुष्पदाः ।**
**मानवाः स्वर्गमिच्छन्ति मोक्षमिच्छन्तिदेवताः** ॥२२७॥ -चाणक्यनीतिदर्पण अ. ५ श्लो. १८

अधनाः धनम् इच्छन्ति। चतुष्पदाः वाचम् च एव (इच्छन्ति)। मानवाः स्वर्गम् इच्छन्ति (तथा) देवताः मोक्षम् इच्छन्ति॥

Poor people want to become rich. Four legged animals want to speak. Humans desire to ascend to heaven. Divinities want final liberation- Moksha.

अधनाः, चतुष्पदाः, मानवाः & देवताः- पु. लिं. प्र. वि. ब. व. of अधनः- a poor man, a pauper- धनम्- न. लिं- wealth, money- अविद्यमानं धनं यस्य सः- अधनः- नञ्बहुव्रीहि स., चतुष्पदः- a quadruped, an animal- चतुर्- numerical adjctv- four, पदम्- a foot- चत्वारि पदानि यस्य सः- चतुष्पदः- बहुव्रीहि स., मानवः- a man, human- (मानव- adjctv- relating to or descended from Manu) & देवता- divine dignity, deity, god, धनम्, वाचम्, स्वर्गम् & मोक्षम्- all in द्वि. वि. ए. व. of धनम्- न. लिं- wealth, money, वाच्- स्त्री. लिं.- voice, ability to talk, power of expression, a word, स्वर्गः- पु. लिं- heaven & मोक्षः- पु. लिं- liberation, salvation, deliverance from recurring birth and death, इच्छन्ति- वर्त. प्र. पु. ब. व. of इष्- इच्छति ६ ग. प. प. to desire, long for, want, च- and & एव- just, merely- both अव्ययs

**चला लक्ष्मीश्चलाः प्राणाश्चले जीवितमन्दिरे ।**
**चलाचले च संसारे धर्म एको हि निश्चलः** ॥२२८॥ -चाणक्यनीतिदर्पण अ. ५ श्लो. २०
पा. भे.: जीवितमन्दिरे = जीवितयौवने

लक्ष्मीः चला (अस्ति), प्राणाः चलाः (सन्ति),  जीवितमन्दिरे (जीवितयौवने) चले (स्तः)। चलाचले संसारे च धर्मः एकः हि निश्चलः (अस्ति) ॥

Wealth is unstable. Breaths of go away. One's life and home (life and youth) are not permanent. In this constantly changing worldly life, Dharma alone is never changing.

लक्ष्मीः- Goddess of wealth, wealth, prosperity, riches & चला- (चल- adjctv)- moveable, unsteady, mobile- both in स्त्री. लिं. प्र. वि. ए. व., प्राणाः & चलाः- both in पु. लिं. प्र. वि. ब. व. of प्राणः- breath of life, life & चलः- see above, जीवितमन्दिरे, जीवितयौवने & चले- all in न. लिं. प्र. वि. द्वि. व. of जीवितमन्दिरम्- life and places of dwelling- जीवितम्- existence, living, life- जीवित- क. भू. धा. वि. of जीव्- जीवति १ ग. प. प. to live, be alive, मन्दिरम्- mansion, habitation, house- जीवितम् च मन्दिरम् च- द्वंद स., जीवितयौवनम्- life and youth- यौवनम्- youth, prime period of life- जीवितम् च यौवनम् च- द्वंद स.& चलम्- moveable, चलाचले & संसारे- both in पु. लिं. स. वि. ए. व. of चलाचलः- static and mobile, changing. चलः- moving, न चलः- अचलः- नञ् तत्पुरुष स. & चलः च अचलः च- चलाचलः- द्वंद स. & संसारः- worldly life, mundane existence, life, धर्मः- prescribed codes of conduct- Dharma, एकः- one, single, alone, निश्चलः (निस् + चलः)- immobile, ever steady, constant, permanent- निस्- अव्यय- prefix implies- absence of, devoid of, च- and & हि- indeed, surely, certainly- both अव्ययs

**नराणां नापितो धूर्तः पक्षिणां चैव वायसः ।**
**चतुष्पदां श्रृगालस्तु स्त्रीणां धूर्ता च मालिनी** ॥२२९॥ -चाणक्यनीतिदर्पण अ. ५ श्लो. २१

नराणाम् नापितः धूर्तः (भवति), पक्षिणाम् च एव वायसः (धूर्तः अस्ति), चतुष्पदाम् श्रृगालः तु (धूर्तः अस्ति तथा) स्त्रीणाम्  च मालिनी धूर्ता (भवति)॥

Among men a barber is cunning person and among the birds a crow also is cunning one. But among the animal kingdom a jackal is a cunning one and among women a female garland-maker is a crafty one.

नराणाम्, पक्षिणाम् & चतुष्पदाम्- all in पु. लिं. ष. वि. ब. व. of नरः- a man, human, male, पक्षिन्- a bird- adjctv- winged, one with the wings & चतुष्पदः- a quadruped, an animal- चतुर्- a numerical adjctv- four, पदम्- foot- चत्वारि पदानि यस्य सः- बहुव्रीहि स., नापितः- a barber, shaver, धूर्तः- a cheat, crafty, swindler, वायसः- a crow, श्रृगालः - a jackal- all in पु. लिं. प्र. वि. ए. व., स्त्रीणाम्- in स्त्री. लिं. ष. वि. ब. व. of स्त्री- a woman, female, धूर्ता- cunning woman, cheat & मालिनी- a female garland maker or wife of a garland maker, florist- both in स्त्री. लिं. प्र. वि. ए. व., तु- but, on the other hand, च- and & एव- just, only, merely- all अव्ययs

**पक्षिणां काकश्चाण्डालः पशूनां चैव कुक्कुरः।**
**मुनीनां कोपी चाण्डालः सर्वेषां चैव निन्दकः** ॥२३०॥ -चाणक्यनीतिदर्पण अ. ६ श्लो. २

पक्षिणाम् काकः चाण्डालः (भवति)। पशूनाम् च एव कुक्कुरः (चाण्डालः भवति)। मुनीनाम् कोपी चाण्डालः (भवति) । तथा सर्वेषाम् च एव निन्दकः (चाण्डालः भवति)॥

A crow is most despised one among birds. A dog is an outcast among animals. An angry sage is not respected among ascetics. But among all, an always criticizing person is most despised.

*Now-a-days, people may not agree with Chanakya's observation regarding dogs, especially in America!*

काकः- a crow, कुक्कुरः- a dog, चाण्डालः-adjctv- a person of wicked /cruel deeds, an outcast, कोपी (कोपिन्)- an angry man, one of angry nature & निन्दकः- a defaming or abusing person- (निन्द्- निन्दति १ ग. प. प. to blame, censure, find fault- निन्दा- blame, censure- निन्दाम् करोति इति- उपपद तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., पक्षिणाम्, पशूनाम्, मुनीनाम् & सर्वेषाम्- all in पु. लिं. ष. वि. ब. व. of पक्षिन्- adjctv- a bird, one with wings, पशुः- an animal, beast, मुनिः- a sage, holy man, saint & सर्वः- all, everyone, च- and & एव- only, merely-both अव्ययs

**आश्रयः कियतामेष तरुः सन्मार्गमाश्रितः।**
**पाथोद सिच्यतां काले नोपेक्ष्यो दूरभावतः**॥२३१॥ -सुभाषितरत्नभाण्डागारम्, वैदिकवाङ्मयम्

पाथोद, एषः सन्मार्गम् आश्रितः, तरुः, कियताम् (यात्रिकानाम्) आश्रयः (भवति)। (सः) दूरभावतः न उपेक्ष्यः (भवति), (भवता सः) काले (जलम्) सिच्यताम्॥

Oh, Cloud, this tree, located on a good road, provides shelter for many (travelers). It should not get neglected because it is located far away. It should get sprinkled by water from you at times.

पाथोद- in पु. लिं. सं. वि. ए. व. of पाथोदः- cloud- पाथः (पाथस्)- न. लिं- water- पाथः ददाति इति- पाथोदः- उपपद तत्पुरुष स., एषः (एतद्)- this, आश्रितः- sought resort to, inhabited by, taken shelter of- क भू. धा. वि. of आ+ श्रि- to take refuge, seek shelter, have recourse to- (श्रि- श्रयति- ते १ ग. प. प. to go, approach), तरुः- a tree, आश्रयः- a resting place, place of refuge, asylum & उपेक्ष्यः- one to be ignored, overlooked, neglected- उपेक्ष्य- (also उपेक्षणीय & उपेक्षितव्य)- क. वि. धा. सा. वि. of उप+ईक्ष्- to neglect, overlook (ईक्ष्- ईक्षते १ ग. आ. प. to see observe)- all in पु. लिं. प्र. वि. ए. व., सन्मार्गम्- in पु. लिं. द्वि. वि. ए. व. of सन्मार्गः- good road, कियताम्- in पु. लिं. द्वि. वि. ए. व. of कियतः- how great, how far, how many, दूरभावतः- being located far away, just because of at far distance- दूर- adjctv- far, distant, भावः- feeling, disposition, तः (तस्)- suffix implies- पं. वि.- 'from', 'due to', काले- in पु. लिं. स. वि. ए. व. of कालः- time, period, सिच्यताम्- कर्मणि प्रयोग आज्ञार्थ प्र. पु. ए. व. of सिच्- सिञ्चति- ते ६ ग. उ. प. to sprinkle, water, न- no, not- अव्यय

**आश्वासयेच्चापि परं सान्त्वधर्मार्थवृत्तिभिः।**
**अथ तं प्रहरेत्काले यदा विचलितं पथि** ॥२३२॥ -महाभा आदिपर्व- १५३.६७, वैदिकवाङ्मयम्

परम् सान्त्व-धर्म-अर्थ-वृत्तिभिः च अपि आश्वासयेत्, अथ यदा पथि विचलितम् तम् काले प्रहरेत्॥

One should sincerely deal with an adversary with conciliation, proper Dharma, offer of wealth and strategic thinking. But if he deviates from this path, one should strike him hard immediately.

परम्, तम्- him & विचलितम्- all in पु. लिं. द्वि. वि. ए. व. of परः- a stranger, foreigner, an adversary, enemy, other, तद्- he & विचलितः- deviated, conceited, flickering- विचलित- क. भू. धा. वि. of वि+ चल्- to deviate, disturb (चल्- चलति १ ग. प. प. to walk, move, shake), सान्त्वधर्मार्थवृत्तिभिः- by apeasing, 'Dharma', wealth or objects and proper conduct- स्त्री. लिं. तृ. वि. ब. व. of सान्त्वधर्मार्थवृत्तिः- सान्त्वः- apeasing, pacification, conciliation- (सान्त्व्- सान्त्वयति-ते १० ग. उ. प. to pacify, appease, comfort), धर्मः- prescribed codes of conduct, 'Dharma' अर्थः- money, wealth, object, purpose, motive- all three- पु. लिं, वृत्तिः- स्त्री. लिं.- conduct, behaviour, mode of action- सान्त्वः च धर्मः च अर्थः च वृत्तिः च- द्वंद स., पथि & काले- both in पु. लिं. स. वि. ए. व. of पथिन्- road, way, manner of conduct & कालः- time, period, प्रहरेत् & आश्वासयेत्- both विध्यर्थ प्र. पु. ए. व. of प्र+ हृ- to strike at, beat- (हृ- हरति-ते १ ग. उ. प. to take, carry) & प्रयोजक of आ+ श्वस्- आश्वासयति- ते to comfort, console, cheer up- (श्वस्- श्वसिति २ ग. प. प. to breathe, respire), च-and, अपि- also, even, तथा- and, likewise, यदा- when & अथ- then, entirely, in this manner- all अव्ययs

**भ्रमन् सम्पूज्यते राजा भ्रमन् सम्पूज्यते द्विज: ।**
**भ्रमन् सम्पूज्यते योगी स्त्री भ्रमन्ती विनश्यति** ॥२३३॥ -चाणक्यनीतिदर्पण अ. ६ श्लो. ४

भ्रमन् राजा सम्पूज्यते, भ्रमन् द्विज: सम्पूज्यते, भ्रमन् योगी सम्पूज्यते, (परन्तु) भ्रमन्ती स्त्री (तु) विनश्यति॥

A King who goes around his kingdom is highly respected (by his subjects). An educated person, who moves around (to offer his services) is respected. An ascetic who travels is also revered. (But) a woman who roams (from place to place) faces downfall.

*Comment: The author may be referring to prostitutes. However, it is still true today that women are not safe if they travel for education, sightseeing or employment. This is unfortunate.*

भ्रमन्- wandering, going about, moving around- भ्रमत्- कर्तरि वर्त. का. वा. धा. सा. वि. of भ्रम्- भ्रमति १ ग. प. प. to roam, wander around, move around, राजा (राजन्)- King, Ruler, द्विज:- one, who is twice born, a member of a priestly class (Brahmin) & योगी (योगिन्)- an ascetic, saint, a follower of 'Yoga' system of philosophy- all in पु. लिं. प्र. वि. ए. व., स्त्री- a woman, wife & भ्रमन्ती (=भ्रमत्- see above)- both in स्त्री. लिं. प्र. वि. ए. व., सम्पूज्यते- कर्मणि प्रयोग प्र. पु. ए. व. of सं+ पूज्- highly honoured, respected, revered- (पूज्- पूजयति-ते १० ग. उ. प. to worship, honour, respect, विनश्यति- वर्त. प्र. पु. ए. व. of वि+ नश्- to be destroyed ruined- (नश्- नश्यति- ४ ग. प. प. to be lost, ruined)

**यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।**
**यस्यार्थाः स पुमांल्लोके यस्यार्थाः स च पण्डितः**॥२३४॥ -चाणक्यनीतिदर्पण अ. ६ .५/अ. ७ .१५

यस्य अर्थाः (सन्ति), तस्य मित्राणि (भवन्ति)। यस्य अर्थाः (सन्ति), तस्य बान्धवाः (भवन्ति)। यस्य अर्थाः (सन्ति), सः लोके पुमान् (भवति)। यस्य अर्थाः (सन्ति), सः च पण्डितः (भवति) ॥

A person with riches has many friends. Relatives flock to the person with wealth. One, who money is counted as a real man in this world. And, a person with wealth is considered as an intelligent person.

यस्य- whose, who has & तस्य- for him, with him- both in पु. लिं. ष. वि. ए. व. यद्- who & तद्- he, अर्थाः & बान्धवाः- both in पु. लिं. प्र. वि. ब. व. of अर्थः- wealth, money, resource, riches & बान्धवः- a kinsman, relative, friend, brother, मित्राणि- in न. लिं. प्र. वि. ब. व. of मित्रम्- a friend, पुमान् (पुंस्)- a man, a male, a real person, सः (तद्)- he & पण्डितः- an intelligent person, expert, wise-man- all in पु. लिं. प्र. वि. ए. व., लोके- in the world/ anong the people- in पु. लिं. स. वि. ए. व. of लोकः- world, people, जीवति- वर्त. प्र. पु. ए. व. of जीव्- १ ग. प. प. to live, to be alive, able to survive, च- and- अव्यय

**कालः पचति भूतानि कालः संहरते प्रजाः।**
**कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः** ॥२३५॥ -चाणक्यनीतिदर्पण अ. ६ .६/अ. ६.७

कालः भूतानि पचति, कालः प्रजाः संहरते, कालः सुप्तेषु जागर्ति, कालः दुरतिक्रमः हि (अस्ति) ॥

Time (eventually) swallows all living beings. It destroys entire populations. It wakes up all who are asleep. Time is impossible to be stopped.

कालः- time, an opportune moment, occasion, the supreme spirit regarded as destroyer of the universe, destiny, fate & दुरतिक्रमः- very difficult to overcome, transgress- दुर्- अव्यय- prefix implies: hard, difficult, bad, अतिक्रमः- transgression, violation, trespass, overcoming, दुख: अतिक्रमः -दुरतिक्रमः- प्रादि कर्मधारय स. (अति+ क्रम्- to surpass, go beyond, trespass- क्रम्- क्रामति- क्रमते १ ग. उ. प. & क्राम्यति- ४ ग. प. प., to go, step approach), भूतानि- in न. लिं. द्वि. वि. ब. व. of भूतम्- living being, creature, प्रजाः- in स्त्री. लिं. द्वि. वि. ब. व. of प्रजा- subjects, mankind, people, पचति, संहरते & जागर्ति- all in वर्त. प्र. पु. ए. व. of पच्- पचति- ते १ ग. उ. प. to cook, digest (as food), सं+ हृ- to destroy, annihilate, to bring together- (हृ- हरति- ते to carry, take) & जागृ- २ ग. प. प. to be awake, to be roused from sleep, सुप्तेषु- पु. लिं. स. वि. ब. व. of सुप्तः- sleeping, slept, asleep- सुप्त- क.भू. धा. वि. of स्वप्- स्वपिति२ ग. प. प. to sleep, हि- indeed, certainly, just- अव्यय

**ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी।**
**भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः** ॥२३६॥ -चाणक्यनीतिदर्पण अ. ६ .१०/अ. ६.११

ऋणकर्ता पिता शत्रुः (भवति)। व्यभिचारिणी माता च (शत्रुः भवति)। रूपवती भार्या शत्रुः (भवति)। पुत्रः अपण्डितः शत्रुः (भवति)॥

A father, who creates debts, is (like) an enemy. An adultress mother is also an enemy. A beautiful wife and a stupid son too are enemies.

*Note: Chanakaya seems to use शत्रुः as a "cause for concern/worry."*

पिता (पितृ)- ऋणकर्ता- one who makes debts- ऋणम्- debt, कर्ता (कतृ)- adjctv- doer, maker, creator- ऋणस्य कर्ता- ष. तत्पुरुष स., शत्रुः- an enemy, पुत्रः- son अपण्डितः- a stupid, foolish- पण्डितः- a wise man, an intelligent person, an expert- न पण्डितः- अपण्डितः- नञ् तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., माता (मातृ)- mother, व्यभिचारिणी (व्यभिचारिन्)- adjctv- one who goes astray, adulterous, unchaste- (वि+अभि + चर्- to go astray, deviate from the right path- चर्- चरति१ ग. प. प. to walk, move, go about), रूपवती- one who is beautiful- रूपम्- figure, appearance, beautiful form, वत् (वती)- adjctv- an affix added to noun implies 'possession', 'quality' & भार्या- wife- all in न. लिं. प्र. वि. ए. व.,च- and-अव्यय

**अनुलोमेन बलिनं प्रतिलोमेन दुर्जनम् ।**
**आत्मतुल्यबलं शत्रुं विनयेन बलेन वा** ॥२३७॥ -चाणक्यनीतिदर्पण अ. ७ , श्लो.१०

बलिनम् अनुलोमेन, दुर्जनम् प्रतिलोमेन, आत्मतुल्यबलम् शत्रुम् विनयेन बलेन वा (जयेत्)॥

One should deal with a stronger adversary with a conciliatory approach, with a wicked person with non-cooperation and with a person of same strength as himself, with due decorum or use of strength.

बलिनम्, दुर्जनम्, आत्मतुल्यबलम् & शत्रुम्- all in पु. लिं. द्वि. वि. ए. व. of बलिन्- adjctv- one who is strong, mighty, powerful- (बलम्- strength, power, might, vigour), दुर्जनः- wicked man, bad person- जनः- person, people- दुष्टः जनः- दुर्जनः- प्रादि कर्मधारयस. आत्मतुल्यबलः- one who is of strength/ power as oneself- आत्मन्- oneself, one's own, तुल्य-adjctv- comparable, equal, same kind of, बलम्- strength- आत्मनः बलम्-आत्मबलं- षष्ठी तत्पु. स. तुल्यं आत्मबलं-आत्मतुल्यबलम्- वि. उ. प. कर्मधारय स. & शत्रुः- an enemy, adversary. अनुलोमेन, प्रतिलोमेन, विनयेन & बलेन- all adjctvs- in पु/न. लि. तृ. वि. ए. व. of अनुलोम- favourable approach, subdued behaviour, प्रतिलोम- opposition, non-cooperation, विनय- polite conduct, decorum, humility, courtesy & बल- strength, वा- or, and-अव्यय

**बाहुवीर्यं बलं राज्ञो ब्राह्मणो ब्रह्मविद् बली।**
**रूपयौवनमाधुर्यं स्त्रीणां बलमुत्तमम्॥**२३८॥ -चाणक्यनीतिदर्पण अ. ७, श्लो.११

राज्ञः बाहुवीर्यम् बलम् (भवति)। ब्रह्मविद् ब्राह्मणः बली (भवति)। रूपयौवनमाधुर्यम् स्त्रीणाम् उत्तमम् बलम् (भवति) ॥

Muscle power is ther real strength of a King. The power of an educated person lies in his knowledge of all-pervading Universal Spirit. Physical beauty, youthfulness and pleasant nature are the best strengths of women.

राज्ञः- in पु. लिं. ष. वि. ए. व. of राजन्- a King, ruler, बाहुवीर्यम्- muscle power, prowess or valour of arms- बाहुः- the arm, fore-arm, वीर्यम्- heroism, prowess, valour- बाह्वोः वीर्यम्- ष. तत्पुरुष स., बलम्-

strength, power, might, रूपयौवनमाधुर्यम्- beautiful form, youthfulness and pleasantness- रूपम्- beautiful form, appearance, यौवन- youth, youthfulness, माधुर्यम्- pleasantness, sweetness- रूपम् च यौवनम् च माधुर्यम् च एतेषां समाहार: - समाहार द्वंद्व स.,उत्तमम्- the superior, best, excellent- all in न. लिं. प्र. वि. ए. व., ब्रह्मविद्- ब्रह्मन्- न. लिं- the Supreme Being, regarded as impersonal and divested of all quality and action, all-prevading soul and spirit of the universe, विद्- adjctv- knowing, familiar with- ब्रह्म वेत्ति इति- उपपद तत्पुरुष स., ब्राह्मणः- a member of a priestly class, theologian, बली (बलिन्)- adjctv- one who is powerful, mighty- both in पु. लिं. प्र. वि. ए. व., स्त्रीणाम्- in स्त्री. लिं. ष. वि. ब. व. of स्त्री- a woman, lady

**अधमा धनमिच्छन्ति धनं मानं च मध्यमाः।**
**उत्तमा मानमिच्छन्ति मानो हि महतां धनम्** ॥२३९॥ -चाणक्यनीतिदर्पण अ. ८, श्लो.१

अधमाः धनम् इच्छन्ति । धनम् मानम् च मध्यमाः (इच्छन्ति) । उत्तमाः मानम् इच्छन्ति। मानः हि महताम् धनम् (भवति) ॥

The meanest people go after wealth alone, while the moderate ones desire to have both the wealth as well as respect. But the best among them desire for high honour. Being respected is the real wealth of noble people.

अधमाः, मध्यमाः & उत्तमाः- पु. लिं. प्र. वि. ब. व. of अधमः- adjctv- the lowest, meanest, मध्यमः- adjctv- the middle one, intermediate, moderate & उत्तमः- adjctv- the excellent, best, one at the top, मानः- पु. लिं respect, honour, pride & धनम्- न. लिं- wealth, money, treasure- both in प्र. वि. ए. व. & also धनम् & मानम्- both in द्वि. वि. ए. व., इच्छन्ति वर्त. प्र. पु. ब. व. of इष्- इच्छति ६ ग. प. प. to desire, long for, want, महताम्- पु. लिं. ष. वि. ब. व. of महत्- afjctv- the great, big, noble, high, च- and & हि- indeed, surely, truly- both अव्ययs

**चाण्डालानां सहस्रैश्च सूरिभिस्तत्त्वदर्शिभिः।**
**एको हि यवनः प्रोक्तो न नीचो यवनात्परः**॥२४०॥ -चाणक्यनीतिदर्पण अ. ८, श्लो.५

तत्त्वदर्शिभिः सूरिभिः प्रोक्तः - "चाण्डालानाम् सहस्रैः एकः हि यवनः (समानः अस्ति)। यवनात् परः नीचः न (कश्चित् भवति) ॥

All the wise men and philosophers (those having known exact nature of the things) have proclaimed that a single foreigner-barbarian is equivalent to thousands of outcasts. None can be of lower caste than a foreigner- barbarian.

चाण्डालानाम्- in पु. लिं. ष. वि. ब. व. of चाण्डालः- a person engaged i cruel/ wicked deeds, an outcast, सहस्रैः- in न. लिं. तृ. वि. ब. व. of सहस्रम्- a thousand, सूरिभिः & तत्त्वदर्शिभिः- in पु. लिं. तृ. वि. ब. व. of सूरिः- learned, wise man, a sage, & तत्त्वदर्शिन्- तत्त्वम्- true principle, exact nature, fact, दर्शिन्- one who is perceiving, knowing- तत्त्वस्य दर्शी - षष्ठी तत्पु स., एकः,- one, single, alone, यवनः- a barbarian, foreigner,initially a Greek. प्रोक्तः- said, proclaimed, declared- प्रोक्त- क. भू. धा. वि. of प्र+ वच्- to declare- (वच्- वक्ति २ ग. प. प. to say, talk), नीचः- mean, worst, परः- the other- all in in

पु. लिं. प्र. वि. ए. व., यवनात्- in पु. लिं. पं. वि. ए. व. of यवनः, च- and, न- no, not & हि- indeed, certainly, truly- all अव्ययs

**नाग्निहोत्रं विना वेदा न च दानं विना क्रिया।**
**न भावेन विना सिद्धिस्तस्माद्भावो हि कारणम्** ॥२४१॥ -चाणक्यनीतिदर्पण अ. ८, श्लो.१०

अग्निहोत्रम् विना वेदाः न (प्रयोजनम् अस्ति), दानम् विना क्रिया न च (भवति तथा) भावेन विना सिद्धिः न (भवति), तस्मात् भावः हि कारणम् (अस्ति)॥

Without oblations to fire-God (Agnihotra), Vedas cannot be learnt. Without liberal donations, a religious ritual cannot be performed. Without devotion, any action will not yield results. Therefore, devotion is indeed root cause of all accomplishments.

अग्निहोत्रम्- an oblation to the God of fire, maintenance of sacred fire- अग्निः- God of fire, होत्रम्- sacrifice, offering oblation- अग्नेः होत्रम्- ष. तत्पुरुष स. & दानम्- charity giving, donation- both in न. लिं. द्वि. वि. ए. व., वेदाः- in पु. लिं. प्र. वि. ब. व. of वेदः- sacred scripture, क्रिया- action, activity, doing, a religious rite & सिद्धिः- accomplishment, fulfilment, perfection- both in स्त्री. लिं. प्र. वि. ए. व., भावः- feeling, sincerity, devotion, disposition, emotion- in पु. लिं. प्र. वि. ए. व., भावेन- in पु. लिं. तृ. वि. ए. व. of भावः, कारणम्- generative cause, motive, means- in न. लिं. प्र. वि. ए. व., तस्मात्- therefore, hence, विना- without, devoid of, absence of, हि- surely, indeed, truly, न- no, not & च- and- all अव्ययs

**काष्ठपाषाणधातूनां कृत्वा भावेन सेवनम्।**
**श्रद्धया च तथा सिद्धिस्तस्य विष्णुः प्रसीदति** ॥२४२॥ -चाणक्यनीतिदर्पण अ. ८, श्लो.११

तस्य सिद्धिः काष्ठपाषाणधातूनाम् भावेन तथा श्रद्धया च सेवनम् कृत्वा (भवति)। विष्णुः प्रसीदति॥

One's goal is accomplished by worshipping any wood, stone and metal (Idol of God) with sincerety and belief. God Almighty (Vishnu) is pleased on him.

काष्ठपाषाणधातूनाम्- in पु. लिं. ष. वि. ब. व. of काष्ठपाषाणधातुः- wood, stone and metal- काष्ठम्- a piece of wood, पाषाणः- stone, धातुः- metal, mineral- काष्ठम् च पाषाणः च धातुः च- द्वंद स., कृत्वा- पू. का. वा. त्वान्त धा. सा. अव्यय of कृ- करोति कुरुते ८ ग. उ. प. to make, do, भावेन & श्रद्धया- both in तृ. वि. ए. व. of भावः- feeling, devotion, sincerity & श्रद्धा- confidence, belief, trust, सेवनम्- act of serving, worshipping, attending upon- in न. लिं. द्वि. वि. ए. व., सिद्धिः- accomplishment, fulfillment, complete attainment, तस्य- to him- in पु. लिं. ष. वि. ए. व. of तद्- he, विष्णुः- Vishnu, God Almighty, प्रसीदति- वर्त. प्र. पु. ए. व. of प्र +सद्- to be pleased, gracious, appeased- (सद्- सीदति- १ ग. प. प. to sit, lie down, to be in distress, despair)

**गुणो भूषयते रूपं शीलं भूषयते कुलम् ।**
**सिद्धिर्भूषयते विद्यां भोगो भूषयते धनम्** ॥२४३॥ -चाणक्यनीतिदर्पण अ. ८, श्लो.१५

गुणः रूपम् भूषयते, शीलम् कुलम् भूषयते, सिद्धिः विद्याम् भूषयते  भोगः धनम् भूषयते

Good virtue enhances one's appearance. An exemplary character dignifies one's family. Success brings credit to the education. Proper utilisation (enjoyment) brings grace to the wealth earned.

गुणः- quality, virtue, merit, excellence, रूपम्- figure, appearance, beauty/handsomeness & भोगः- utility, enjoyment, experiencing- all in पु. लिं. प्र. वि. ए. व., शीलम्- character, nature behaviour, disposition, custom- in न. लिं. प्र. वि. ए. व., कुलम्- family, race, noble descent & धनम्- wealth, money, riches- both in न. लिं. द्वि. वि. ए. व., , सिद्धिः- accomplishment, fulfillment, success- in स्त्री. लिं. प्र. वि. ए. व., विद्याम्- in स्त्री. लिं. द्वि. वि. ए. व. of विद्या- knowledge, learning, education, expertise, भूषयते- प्रयोजक वर्त. प्र. पु. ए. व. of भूष्- to cause to enhance beauty, grace, adorn, decorate- भूष्- भूषति १ ग. प. प. to adorn, grace

**निर्गुणस्य हृतं रूपं दुःशीलस्य हृतं कुलम् ।**
**असिद्धस्य हृता विद्या अभोगेन हृतं धनम्** ॥२४४॥ -चाणक्यनीतिदर्पण अ. ८, श्लो.१६

निर्गुणस्य रूपम् हृतम् (भवति)। दुःशीलस्य कुलम् हृतम् (भवति)। असिद्धस्य विद्या हृता (भवति)। तथा) अभोगेन धनम् हृतम् (भवति)॥

A person without virtues looses his appearance. A person with bad character has tarnishes his family. Education of an unsuccessful person is wasted. Non-utilisation of wealth results in its destruction.

निर्गुणस्य, दुःशीलस्य & असिद्धस्य- all in पु. लिं. ष. वि. ए. व. of निर्गुणः- one who is devoid of any virtue, merit- गुणः- virtue, merit- निर्गता: गुणा: यस्मात् स:- निर्गुण: & दुःशीलः- one who is of a bad character- शीलम्- character, behaviour, nature- दुष्टम् शीलम् यस्य सः- both प्रादि बहुव्रीहि स. & असिद्धः- one who is a failure (in any achievement)- सिद्धः- one who is accomplished, successful- सिद्ध- क. भू. धा. वि. of सिध्- सिध्यति ४ ग. प. प. to be accomplished, successful- न सिद्धः- असिद्धः- नञ् तत्पुरुष स., हृतम्- destroyed, ruined, lost- हृत- क. भू. धा. वि. of हृ- हरति- ते- to carry, take away, रूपम्- appearance, beauty, कुलम्- family, race & धनम्- wealth, money, riches- all in न. लिं. प्र. वि. ए. व., हृता- (हृत) & विद्या- knowledge, expertise, education- both in स्त्री. लिं. प्र. वि. ए. व., अभोगेन- in पु. लिं. तृ. वि. ए. व. of अभोगः- non-utilisation, non-enjoyment- भोगः- enjoyment, utility- न भोगः- अभोगः- नञ् तत्पुरुष स.

**आपो विमुक्ताः क्वचिदाप एव**
**क्वचिन्न किञ्चिद् गरलं क्वचिच्च ।**
**यस्मिन्विमुक्ताः प्रभवन्ति मुक्ताः**
**पयोद तस्मिन्विमुखः कुतस्त्वम्** ॥२४५॥--सुभाषितरत्नभाण्डागारम्, वैदिकवाङ्ग्यम्

(हे) पयोद, (त्वया) विमुक्ताः आपः, क्वचित् आपः एव (अवतिष्ठति), क्वचित् (आपः) न किञ्चित् (अवशेषति), (तथा) क्वचित् (आपः) च गरलम् (भवति)। (परन्तु क्वचित् आपः) यस्मिन् विमुक्ताः मुक्ताः प्रभवन्ति, तस्मिन् त्वम् विमुखः कुतः (भवसि)?

Oh, Cloud, some of the water released by you remains as water only, while nothing remains from some of it! Some part of it gets turned into poison. But from some portion of it turns into pearls (lifesaving food grains). Why then, do you turn away from these (fields)?

पयस्- न. लिं.- water- पयः ददाति इति- पयोद- water giver, cloud- in पु. लिं. सं. वि. ए. व., आपः- (अप्- स्त्री. लिं- declined in classical language- only in plural- आपः, अपः, अद्भिः, अद्भ्यः, अपां & अप्सु), मुक्ताः- freed, let off & विमुक्ताः- released, liberated- मुक्त & विमुक्त- क. भू. धा. वि. of वि+ मुच्- to release, let go & मुच्- मुञ्चति- ते ६ ग. उ. प. to let go, free- all in स्त्री. लिं. प्र. वि. ब. व., किञ्चित्- (किम्- who, what, why- किम्+ चित्- a little, small quality- न किञ्चित्- not even a bit & गरलम्- poison, venom in general- both in न. लिं. प्र. वि. ए. व., यस्मिन्- in which & तस्मिन्- in that- both in पु/न. लिं. स. वि. ए. व. of यद्- who & तद्- that, it, प्रभवन्ति- वर्त. प्र. पु. ब. व. of प्र+ भू- to be produced, to become- (भू- भवति १ ग. प. प. to be, to exist), त्वम् & विमुखः- both in पु. लिं. प्र. वि. ए. व. of युष्मद्- you & विमुखः- adjctv- disinclined, averse, opposed- विगतम् मुखम् - प्रादि कर्मधारय स., क्व- अव्यय- where,, whither- क्व + चित्- क्वचित्- in some places, some cases, sometimes, एव- just, mere, only, न- no not, च- and, कुतः (कुतस्)- how, from where, in what manner- all अव्ययs

**शुद्धं भूमिगतं तोयं शुद्धा नारी पतिव्रता ।**
**शुचिः क्षेमकरो राजा सन्तोषी ब्राह्मणः शुचिः** ॥२४६॥ -चाणक्यनीतिदर्पण अ. ८, श्लो.१६

भूमिगतम् तोयम् शुद्धम् (भवति)।पतिव्रता नारी (पत्नीवत: नर: शुद्ध:) शुद्धा (अस्ति)। क्षेमकरः राजा शुचिः (गण्यते)। (तथा) सन्तोषी ब्राह्मणः शुचिः (भवति)॥

The water percolated through the earth is pure. A devout wife (husband) is faultless. A King engaged in welfare shows correct duty. A contended Brahmana is pious.

भूमिगतम्- one that has gone into the earth- भूमिः- earth, ground, गत- gone, entered- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go- भूमौ गतम्- स. तत्पुरुष स., तोयम्- water, शुद्धम्- pure, purified, clean, chaste, undefiled, innocent- शुद्ध- क. भू. धा. वि. of शुध्- शुध्यति ४ ग. प. प.to be purified, clean- all in न. लिं. प्र. वि. ए. व., शुद्धा- pure, chaste, नारी- woman, पतिव्रता- a devoted or faithful wife- पतिः- husband, व्रता- devoted, faithful- पतौ वर्तते इति- उपपद तत्पुरुष स.- in स्त्री. लिं. प्र. वि. ए. व., शुचिः- adjctv- pure, resplendent, virtuous, pious, क्षेमकरः- propitious, protecting peace and happiness, beneficial- क्षेम- adjctv- well-being, comfort, beneficial, करः- doer- क्षेमम् कारयति इति- उपपद तत्पुरुष स., राजा (राजन्)- King, Ruler, सन्तोषी (सन्तोषिन्)- satisfied, contended, happy, ब्राह्मणः- a member of a priestly class, 'Brahman'- all in पु. लिं. प्र. वि. ए. व.

**असन्तुष्टा द्विजा नष्टाः सन्तुष्टाश्च महीभृतः ।**
**सलज्जा गणिका नष्टा निर्लज्जाश्च कुलाङ्गनाः** ॥२४७॥ -चाणक्यनीतिदर्पण अ. ८, श्लो.१८

पा. भे.:  महीभृतः= महीभुजाः

असन्तुष्टाः द्विजाः नष्टाः, सन्तुष्टाः  महीभृतः (महीभुजाः) च (नष्टाः), सलज्जा गणिका नष्टा ( तथा) निर्लज्जाः कुलाङ्गनाः च (नष्टाः भवन्ति)॥

Educated but greedy people, Kings content with what they have, a modest courtesan and an immodest woman from a good family are ruined.

सन्तुष्टाः, असन्तुष्टाः, द्विजाः, नष्टाः, महीभृतः & महीभुजाः- all in पु. लिं. प्र. वि. ब. व. of सन्तुष्टः- satisfied, happy, contented, असन्तुष्टः- unsatisfied, unhappy- न सन्तुष्टः- असन्तुष्टः- नञ् तत्पुरुष स.- सन्तुष्ट- क. भू. धा. वि. of सं+ तुष्- to be well satisfied, contented- (तुष्- तुष्यति ४ ग. प. प. to be satisfied, contented, pleased), द्विजः- twice born, a member of educated class, brahman, नष्टः- ruined, got destroyed, lost- क. भू. धा. वि. of नश्- नश्यति ४ ग. प. प. to be lost, destroyed, महीभृत् & महीभुजः- king, ruler- मही- earth, land, ground- महीम् बिभर्ति इति- महीभृत् & महीम् भुनक्ति इति- महीभुजः,- both उपपद तत्पुरुष स., सलज्जा- modest, bashful- लज्जा- modesty, shame- लज्जया सह - सलज्जा-  तृ. तत्पु. स., गणिका- a courtesan, harlot, नष्टा (नष्ट)- destroyed- all in स्त्री. लिं. प्र. वि. ए. व., निर्लज्जाः & कुलाङ्गनाः- both in स्त्री. लिं. प्र. वि. ब. व. of निर्लज्जा- shameless, immodest- निर्गता लज्जा यस्याः सा- प्रादिबहुव्रीहि स. & कुलाङ्गना- woman from good family, respectable, chaste lady- कुलम्- न. लिं- family, race, अङ्गना- lady, woman- कुलस्य अङ्गना - कुलाङ्गना- षष्ठी तत्पु स., च- and- अव्यय

**मांसभक्षैः सुरापानैर्मूर्खैश्चाऽक्षरवर्जितैः ।**
**पशुभिः पुरुषाकारैर्भाराक्रान्ताऽस्ति मेदिनी** ॥२४८॥ - चाणक्यनीतिदर्पण अ. ८ श्लो. २१

मांसभक्षैः, सुरापानैः, मूर्खैः अक्षरवर्जितैः, पुरुषाकारैः पशुभिः च मेदिनी भाराक्रान्ता अस्ति॥

This earth is overburdened with meat- eaters, alcoholics, stupid and illiterate animals in the forms of humans.

मेदिनी- earth, ground, land & भाराक्रान्ता- burdened, weighed down- भारः- load, burden, weight, आक्रान्ता- distressed, troubled, seized, overtaken- आक्रान्त- क. भू. धा. वि. of आ+ क्रम्- to overcome, occupy, fill, vanquish, conquer (क्रम्- क्रामति- क्रमते, क्राम्यते १ ग. उ. प. & ४ ग. आ. प. to go, occupy- भारेण आक्रान्ता - तृ. तत्पुरुष स.- both in स्त्री. लिं. प्र. वि. ए. व., मांसभक्षैः, सुरापानैः, मूर्खैः अक्षरवर्जितैः, पशुभिः, पुरुषाकारैः- all in पु. लिं. तृ. वि. ब. व. of मांसभक्षः- meat-eater, flesh-eating- मांसम्- flesh, meat, भक्षः- food, eating- मांसम् भक्षयति इति  - मांसभक्षः- उपपद तत्पुरुष स., सुरापानः- one who consumes spirituous liquor /wine, an alcoholic- सुरा- a spirituous liquor, wine, alcohol, पानम्- a drink, drinking, beverage in general- सुरायाः पानम् करोति इति- सुरापानः तत्पुरुष स., मूर्खः- a stupid, foolish person, अक्षरवर्जितः- illiterate- अक्षरम्- a letter of a alphabet, a word, वर्जितः- devoid of, lacking- वर्जित- क. भू. धा. वि. of वृज्- वर्जति १ ग. प. प. to shun, avoid, abstain from- अक्षरेण वर्जितः - तृ. तत्पुरुष स., पशुः- an animal, पुरुषाकारः- one in human form, पुरुषः- a man, person, human, आकारः- form, shape, figure- पुरुषस्य आकारः- षष्ठी तत्पुरुष स ., अस्ति- वर्त. प्र. पु. ए. व. अस्- १ ग. प. प. to be, exist, become, च- अव्यय

**अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनश्च ऋत्विजः।**
**यजमानं दानहीनो नास्ति यज्ञसमो रिपुः** ॥२४९॥ - चाणक्यनीतिदर्पण अ. ८ श्लो. २२

अन्नहीनः (यज्ञः) राष्ट्रम् दहेद्, मन्त्रहीनः (यज्ञः) च ऋत्विजः (दहेद्), दानहीनः (यज्ञः) यजमानम् (दहेद्), यज्ञसमः रिपुः न अस्ति ॥

A sacrificial rite, Yajnya, (performed by a King) without feeding the subjects may destroy his Kingdom. Yajnya performed devoid of sacred hymns may torment the priest. Yajnya conducted without giving proper donations may scorch the host. Thus, there is no enemy greater than (improperly conducted) sacrificial rite.

अन्नहीनः- one that is devoid of any distribution of food- अन्नम्- न. लिं- food (in general), हीन- devoid of, absence of- क. भू. धा. वि. of हा- जहाति २ ग. प. प. tp avoid, shun- अन्नेन हीनः, मन्त्रहीनः- one that is devoid of Vedic hymn, sacred prayer- मन्त्रः- Vedic hymn, sacred prayer- मन्त्रेण हीनः, दानहीनः- one that is devoid of gift, donation- दानम्- न. लिं- gift, donation, giving- दानेन हीनः- all three तृ. तत्पुरुष स., यज्ञसमः- one that is comparable to 'Yajnya'- sacrificial rite, specific act of worship- यज्ञः- sacrificial rite, specific act of worship, सम- adjctv- equal to, similar to, comparable to- यज्ञस्य समः- ष. तत्पुरुष स., रिपुः- an enemy, adversary- all in पु. लिं. प्र. वि. ए. व., दहेत्- विध्यर्थ प्र. पु. ए. व. of दह्- दहति १ ग. प. प. to burn, scorch, destroy, राष्ट्रम्- kingdom, country- in न. लिं. द्वि. वि. ए. व., ऋत्विजः- in पु. लिं. द्वि. वि. ब. व. of ऋत्विज्- a priest who officiates at the ritual sacrifice ('Yajnya') यजमानम्- in पु. लिं. द्वि. वि. ए. व. of यजमानः- the Master of the ceremony, the conductor, patron,host अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, न- no, not, च- and- both अव्ययs

**मन्दोऽप्यमन्दतामेति संसर्गेण विपश्चितः।**
**पङ्कच्छिदः फलस्येव निकषेणाविलं पयः**॥२५०॥ -मालविकाग्निमित्रम्, वैदिकवाङ्मयम्

पङ्कच्छिदः फलस्य निकषेण आविलम् पयः (निर्मलताम् याति) । इव मन्दः अपि विपश्चितः संसर्गेण अमन्दताम् एति॥

By adding soap-nut powder to the dirty water, the turbidity of the water settles down. Similarly, a stupid man sheds his lethargy by the association with a learned person

पङ्कच्छिदः, फलस्य & विपश्चितः- all in पु/न. लिं. ष. वि. ए. व. of पङ्कच्छिद्- clearing nut tree, फल- fruit, used in settling turbid water- soap nut- रिठा in Marathi)- पङ्कः/म्- mud, clay, mire- पङ्कम् छिनत्ति इति- पङ्कच्छिद्- उपपद तत्पुरुष स., फलम्- fruit & विपश्चित्- learned, wise, sage, निकषेण & संसर्गेण- both in पु. लिं. तृ. वि. ए. व. of निकष- contact, touch- (नि+ कष्- to come together- कष्- कषति- ते १ ग. उ. प. to rub, scratch) & संसर्गः- contact, association, company, proximity, touch, आविलम् & पयः- both in न. लिं. प्र. वि. ए. व. of आविल- adjctv- turbid, muddy & पयस्- water, मन्दः- slow, lazy, inactive, stupid- in पु. लिं. प्र. वि. ए. व., अमन्दताम्- in स्त्री. लिं. द्वि. वि. ए. व. of अमन्दता- absence of laziness /stupidity- मन्द- adjctv- न मन्द- अमन्द- नञ् तत्पुरुष स.- ता suffix implies quality, nature, एति- वर्त. प्र. पु. ए. व. of इ- २ ग. प. प. to go, attain to, become, reach इव- like, similar to & अपि- also, even- both अव्ययs

**अबन्धुर्बन्धुतामेति नैकट्याभ्यासयोगतः।**
**यात्यनभ्यासतो दूरात्स्नेहो बन्धुषु तानवम्**॥२५१॥ -असम-संस्कृतसाहित्यम्

अबन्धुः नैकट्य-अभ्यास-योगत: (योगात्) बन्धुताम् एति। बन्धुषु स्नेहः,दूरात् अनभ्यासतः तानवम् याति॥

A stranger becomes a relative by constant company. But an affection among relatives far away and not in constant contact, fades away.

Out of sight, out of mind!

बन्धुः- a relative, kinsman, brother, न बन्धुः- अबन्धुः- नञ् तत्पुरुष स.- a stranger, unrelated person & स्नेहः- friendship, affection, love, kindness, tenderness- both in पु. लिं. प्र. वि. ए. व., बन्धुताम्- in स्त्री. लिं. द्वि. वि. ए. व. of बन्धुता- friendliness, kinsmanship, तानवम्- smallness, reduction, depletion, weakness, thinness- in न. लिं. द्वि. वि. ए. व., ऐकट्यम्- loneliness, न ऐकट्यम्- नैकट्यम्- नञ् तत्पुरुष स न. लिं.- proximity, closeness नैकट्याभ्यासयोगत:- by virtue of constant proximity or company-, अभ्यासः- पु. लिं- constant practice, continued relationship, योगः- पु. लिं- application, manner, means, touch- नैकट्यम् अभ्यासः-कर्मधारय स.  नैकट्याभ्यासस्य  योगः - नैकट्याभ्यासयोगः- षष्ठी तत्पु स. & तस्/ तः- suffix implies 'by'/'from' as in पं. वि., बन्धुषु- in पु. लिं. स. वि. ब. व. of बन्धुः- see above, दूरात्- पं. वि. ए. व. of दूर- adjctv- remote, far off, distant, long way off, अनभ्यासतः- by virtue of continued absence or out of touch/ practice- न अभ्यासः- अनभ्यासः- absence of practice/touch- तस्/ तः- see above, याति & एति- both in वर्त. प्र. पु. व. २ ग. प. प. of या- to go, to happen, become, undergo & इ- to go, to come to, become

**स्वभावसुन्दरं वस्तु न संस्कारमपेक्षते**
**मुक्तारत्नस्य शाणाश्मघर्षणं नोपयुज्यते**॥२५२॥ श्रीकुसुमदेवविरचितं दृष्टान्तकलिकाशतकम्- श्लो. ४९

स्वभावसुन्दरम् वस्तु न संस्कारम् अपेक्षते। मुक्तारत्नस्य शाणाष्मघर्षणम् न उपयुज्यते॥

An object or a person of inherent beauty does not require any further treatment.One does not deploy polishing for a pearl jewel by a whetstone.

स्वभावसुन्दरम्- beautiful by nature/ by birth itself - स्व- self, one's own, भावः- true condition, innate property, disposition, nature, सुन्दरम्- beautiful, presentable- स्वस्य भावः- स्वभावः- ष. तत्पुरुष स. & स्वभावेन सुन्दरम्- तृ. तत्पुरुष स., वस्तु- article, item, thing, object- both in न. लिं. प्र. वि. ए. व., संस्कारम्- in पु. लिं. द्वि. वि. ए. व. of संस्कारः- refining, polishing, processing, treatment, शाणाष्मघर्षणम्- polishing by a whetstone- शाणः- whetstone, polishing stone, अष्मन्- stone, घर्षणम्- rubbing, polishing- शाणस्य अष्मन्- शाणाष्मन् & शाणाष्मनः घर्षणम्- शाणाष्मघर्षणम्- both ष. तत्पुरुष स.- in न. लिं. द्वि. वि. ए. व., अपेक्षते- वर्त. प्र. पु. ए. व. of अप+ ईक्ष्- to expect, await, require- (ईक्ष्- ईक्षते १ ग. आ. प. to see, look, observe), मुक्तारत्नस्य- in न. लिं. ष. वि. ए. व. of मुक्तारत्नम्- a gem of pearl- मुक्ता- a pearl, रत्नम्- a jewel, gem- मुक्तायाः रत्नम्- ष. तत्पुरुष स., उपयुज्यते- कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of उप+ युज्- to deploy, make use of (युज्- युनक्ति युंक्ते ७ ग. उ. प. to to join, unite, connect), न- no, not- अव्यय

**रविरपि न दहति तादृग्यादृग्संदहति बालुकानिकरः**
**अन्यस्माल्लब्धपदो नीचः प्रायेण दुःसहो भवति**॥२५३॥ -महासुभाषितसंग्रह, असम-संस्कृतसाहित्यम्

रविः अपि तादृग् न दहति, यादृग् बालुकानिकरः संदहति। प्रायेण नीचः अन्यस्मात् लब्धपदः दुःसहः भवति॥

The Sun does not burn us as much the (Sun-exposed) sand-dune scorches. Generally, a person with low qualification after achievinges a (high) position from someone else becomes unbearable.

रविः-the Sun, बालुकानिकरः- a sand-dune- बालुका (वालुका)- स्त्री. लिं.- sand, gravel, निकरः- पु. लिं.- heap, pile, collection- बालुकायाः निकरः- ष. तत्पुरुष स., नीचः- a mean or low person, लब्धपदः- one who has acquired position/ qualification- लब्ध- acquired, gained- क. भू. धा. वि. of लभ्- लभते १ ग. आ. प. to get, obtain, पदम्- न. लिं- position, status- लब्धम् पदम् येन सः- बहुव्रीहि स. & दुःसहः- unbearable, intolerable- दुःखेन सह्यते इति- उपपद तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., अन्यस्मात्- in पु. लिं. पं. वि. ए. व. of अन्यः- the other, another, दहति, संदहति & भवति- all in वर्त. प्र. पु. ए. व. of दह् & सं+दह्- १ ग. प. प. to burn, scorch & भू- १ ग. प. प. to be, to exist, to become, अपि- also, even, तादृग्- in that manner, similar to, यादृग्- in which manner, similar to which, न- no, not & प्रायेण- possibly, probably, mostly, generally- all अव्ययs

**धनहीनो न हीनश्च धनिकः स सुनिश्चयः ।**
**विद्यारत्नेन हीनो यः स हीनः सर्ववस्तुषु** ॥२५४॥ - चाणक्यनीतिदर्पण अ. १० श्लो. १

धनहीनः, (यदि सः विद्यया भूषितः अस्ति तदा सः) हीनः च न (भवति)। सः धनिकः सुनिश्चयः (अस्ति)। यः विद्यारत्नेन हीनः, सः सर्ववस्तुषु हीनः (एव भवति) ॥

A poor person is not a destitute (if he has good education). He is undoubtedly a rich person. (On the other hand), a person without education jewel, has indeed lost every thing.

हीनः- a destitute, deficient, one who is devoid of or deprived of a thing- हीन- क. भू. धा. वि. of हा- जहाति २ ग. प. प. to abandon, leave, give up, धनहीनः- one who is devoid of money, wealth- धनम्- money, wealth, धनेन हीनः- तृ. तत्पुरुष स., धनिकः- a wealthy or resourceful person, सुनिश्चयः- very certainly, undoubtedly- सु- अव्यय- prefix implies: very, most, निश्चयः- certainly, definitely, यः (यद्)- who, सः (तद्)- he- all in पु. लि. प्र. वि. ए. व., सर्ववस्तुषु- in न. लि. स. वि. ब. व. of सर्ववस्तु- all objects- सर्व- adjctv- all entire, वस्तु- article, object, item, विद्यारत्नेन- in न. लि. तृ. वि. ए. व. of विद्यारत्नम्- a jewel called Knowledge- विद्या- Knowledge, expertise, learning, रत्नम्- jewel, gem- विद्या रत्नम् इव- उपमान. उ. प. कर्मधारय स., च- and & न- no, not- both अव्ययs

**सुखार्थी चेत् त्यजेद्विद्यां विद्यार्थी चेत् त्यजेत्सुखम्**
**सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्**॥२५५॥ - चाणक्यनीतिदर्पण अ. १० श्लो. ३

सुखार्थी चेत्, (सः) विद्याम् त्यजेत्, विद्यार्थी चेत्, (सः) सुखम् त्यजेत्। सुखार्थिनः कुतः विद्या (लभते)? विद्यार्थिनः कुतः सुखम् (लभते)?

A person, who wants a happy life, should abandon knowledge. One, who wants to seek knowledge, should forgo a happy life. How can a pleasure-seeker gain knowledge? How can a knowledge-seeker get happiness?

सुखार्थी (सुखार्थिन्)- one, who is seeking to enjoy life, to be happy- सुखम्- न. लिं- joy, happiness, अर्थिन्- seeking a gain, obtain- सुखस्य अर्थिन् & विद्यार्थी (विद्यार्थिन्)- seeker of knowledge, learning, expertise- विद्या- स्त्री. लिं- knowledge, learning, expertise- विद्याया अर्थिन् - both ष. तत्पु स., सुखार्थिनः & विद्यार्थिनः- both in ष. वि. ए. व. of सुखार्थिन् & विद्यार्थिन्, विद्या & विद्याम्- in स्त्री. लि. प्र. वि & द्वि. वि. ए. व. of विद्या & सुखम्- in न. लि. प्र. वि & द्वि. वि. ए. व., त्यजेत्- विध्यर्थ प्र. वि. ए. व. of त्यज्- त्यजति १ ग. प. प. to leave, abandon, कुतः (कुतस्)- from where, how, in what manner & चेद्- if, provided that, in case- both अव्ययs

**रङ्कं करोति राजानं राजानं रङ्कमेव च ।**
**धनिनं निर्धनं चैव निर्धनं धनिनं विधिः** ॥२५६॥ - चाणक्यनीतिदर्पण अ. १० श्लो. ५

विधिः रङ्कम् राजानम् करोति । राजानम् रङ्कम् एव च (करोति)। (सः) धनिनम् निर्धनम् (करोति), (तथा) निर्धनम् धनिनम् च एव (करोति) ॥

Destiny turns a beggar into a King and a King into a beggar. It also turns a wealthy rich man into a pauper or poor man into a wealthy person.

विधिः- destiny, fate, luck- in पु. लि. प्र. वि. ए. व., रङ्कम्, राजानम्, निर्धनम् & धनिनम्- all in पु. लि. द्वि. वि. ए. व. of रङ्कः- a beggar, wretch, राजन्- a King, निर्धनः- a poor man, pauper- धनम्- wealth, money, riches- निर्गतम् धनम् यस्मात् सः- नञ् बहुव्रीहि स. & धनिन्- a wealthy man, एव- mere, only, just, च- and- both अव्ययs

**विप्रो वृक्षस्तस्य मूलं च सन्ध्या**
**वेदाः शाखा धर्मकर्माणि पत्रम् ।**
**तस्मान्मूलं यत्नतो रक्षणीयं**
**छिन्ने मूले नैव शाखा न पत्रम्** ॥२५७॥ -चाणक्यनीतिदर्पण अ. १० श्लो.१३

विप्रः वृक्षः (इव अस्ति)। तस्य मूलम् सन्ध्या, शाखाः वेदाः, धर्मकर्माणि च पत्रम् (सन्ति)। तस्मात् मूलम् यत्नतः रक्षणीयम् (भवति)। मूले, छिन्ने न एव शाखा न पत्रम् (वर्तते) ॥

An educated person (well versed with scriptures) is like a tree. His prayers are main root of that tree. Scriptures are the branches and Dharma and its practice are the leaves of that tree. Therefore, its very root must be protected with all efforts. If the root itself is cut off, there would be no branch or not even a leaf.

विप्रः- a brahmin, member of a priestly class, one who is knowledgeable in scriptures & वृक्षः- a tree- both in पु. लिं. प्र. वि. ए. व., सन्ध्या- the morning, noon and evening prayers - in स्त्री. लिं. प्र. वि. ए. व., तस्य- its- in पु. लिं. ष. वि. ए. व. of तद्- that, it, he, मूलम्- root, base, origin & पत्रम्- a leaf-

both in न. लिं. प्र. वि. ए. व., वेदाः- in पु. लिं. प्र. वि. ब. व. of वेदः- Veda- scripture, धर्मकर्माणि-in न. लिं. प्र. वि. ब. व. of धर्मकर्मन्- धर्मः- पु. लिं.- prescribed codes of conduct- Dharma & कर्मन्- न. लिं- duty, work, action- धर्मः च कर्मन् च- धर्मकर्मन्- द्वंद्व स., मूलम्- root & रक्षणीयम्-to be protected, guarded- रक्षणीय- (also रक्षितव्य & प्ररक्ष्य)- क. वि. धा. सा. वि. of रक्ष्- रक्षति १ ग. प. प. to guard, protect, save- both in न. लिं. प्र. वि. द्वि. व., यत्नतः (यत्नतस्)- with effort, exertion- यत्नः- effort, exertion- तस्- suffix implies: by, with, from (like पं. वि.), शाखा & शाखाः- in स्त्री. लिं. प्र. वि. ए. व. & ब. व.- a branch (of a tree, an institute etc), छिन्ने & मूले- both in न. लिं. स. वि. ए. व. of छिन्नम्- cut, lop off, break asunder- छिन्न- क. भू. धा. वि. of छिद्- छिनत्ति छिन्ते ७ ग. उ. प. to cut & मूलम्- root, च- and, न- no, not, एव- just, only, merely & तस्मात्- therefore, for this reason- all अव्ययs

**का चिन्ता मम जीवने यदि हरिर्विश्वम्भरो गीयते**
**नो चेदर्भकजीवनाय जननीस्तन्यं कथं निर्मयेत्।**
**इत्यालोच्य मुहुर्मुहुर्यदुपते लक्ष्मीपते केवलं**
**त्वत्पादाम्बुजसेवनेन सततं कालो मया नीयते** ॥२५८॥ -चाणक्यनीतिदर्पण अ. १० श्लो. १७

(हे) यदुपते लक्ष्मीपते, 'यदि हरिः विश्वम्भरः गीयते, मम जीवने का चिन्ता (अस्ति)? नो चेद् अर्भकजीवनाय जननीस्तन्यम् कथम् निर्मयेत्?' इति मुहुः मुहुः आलोच्य मया, त्वत् पादाम्बुजसेवनेन सततम् कालः केवलम् नीयते॥

When Lord Hari, is sung as sustaining the whole Universe, what worry is there in my life? If He were not, how is milk produced in the breast of the mother to sustain a new-born baby? Thinking this, again and again, Oh, Yadupati, Oh Lakshmipati, I always spend my time only in service of your lotus-feet.

यदुपते & लक्ष्मीपते-both in पु. लिं.स. वि. ए. व. of यदुपतिः- Lord of Yadavas- epithet of Krishna- यदुः- an ancient King, ancestor of Yadavas- यादवानाम् पतिः & लक्ष्मीपतिः- Lord of Lakshmi-epithet of Vishnu- लक्ष्मीः- Goddess of wealth- लक्ष्म्याः पतिः- both ष. तत्पुरुष स., हरिः- God, विश्वम्भरः- all sustaining, pervading, supreme spirit- विश्वम्- the universe, world- विश्वम् भरति इति- उपपद तत्पुरुष स. & कालः- time, period- all in पु. लिं. प्र. वि. ए. व., गीयते & नीयते- both कर्मणि प्रयोग वर्त. प्र. पु. ए. व. of गै- गायति १ ग. प. प. to sing, to describe in a song & नी- नयति- ते १ ग. उ. प. to lead, to carry off, मम- my- ष. वि. ए. व. of अस्मद्- I, we, जीवने- in न. लिं. स. वि. ए. व. of जीवनम्- existence, sustainance, का- what & चिन्ता- worry, anxiety, thought- both in स्त्री. लिं. प्र. वि. ए. व., अर्भकजीवनाय- in न. लिं. च. वि. ए. व. of अर्भकजीवनम्- अर्भकः- just born child, young one of animals, अर्भकस्य जीवनम्- ष. तत्पुरुष स., जननीस्तन्यम्- milk of mother's breast- in न. लिं. द्वि. वि. ए. व.- जननी- mother, स्तनः- the female breast, स्तन्यम्- mother's milk- जनन्याः स्तन्यम्- ष. तत्पुरुष स., निर्मयेत्- in प. प. विध्यर्थ प्र. पु. ए. व. of निस्+ मी- निर्मयति- to make, create- (मी- मयति १ ग. प. प. to go, move in प. प.), आलोच्य- पू. का. वा. ल्यबन्त धा. सा. अव्यय of आ+ लोच्- to think ponder, consider, perceive- (लोच्- लोचते १ ग. आ. प. to see, observe), मया- by me- in तृ. वि. ए. व. of अस्मद्- I, त्वत्- yours- in पं. वि. ए. व. of युष्मद्- you, पादाम्बुजसेवनेन- in न. लिं. तृ. वि. ए. व. of पादाम्बुजसेवनेम्- service of lotus feet- पादः-foot, अम्बु- न. लिं- water- अम्बुनि जायते इति- अम्बुजम्- Lotus- पादम् अम्बुजम् इव- पादाम्बुजम्- वि. उ. प. कर्मधारय स. & पादाम्बुजस्य सेवनेम्- ष. तत्पुरुष स, यदि- if, in case, इति- a particle used to report the very words spoken- thus, so, मुहुः (मुहुस्)- often,

constantly- मुहुः मुहुः- over and over again, कथम्- how, which way, manner, नो चेद्- if not, otherwise, केवलम्- only, merely, solely, सततम्- always, constantly, repeatedly- all अव्ययs

**शाकेन रोगा वर्धन्ते पयसा वर्धते तनुः ।**
**घृतेन वर्धते वीर्यं मांसान्मांसं प्रवर्धते** ॥२५९॥ - चाणक्यनीतिदर्पण अ. १० श्लो. २०

शाकेन रोगाः वर्धन्ते, पयसा तनुः वर्धते, घृतेन वीर्यम् वर्धते (तथा) मांसात्  मांसम् प्रवर्धते॥

Consumption of greens increases the maladies. Milk helps in bodybuilding; Ghee helps in increase of virility and consumption of flesh helps development of flesh.

*Obviously, this was not based on any scientific study or improper data.*

शाकेन, पयसा & घृतेन- all in तृ. वि. ए. व. of शाकः/कम्- पु/न. लिं- greens, leafy vegetable, पयस्- न. लिं- milk (also mean water) & घृतम्- ghee, clarified butter, रोगाः- in पु. लिं. प्र. वि.. ब. व. of रोगः- disease, sickness, वर्धते & वर्धन्ते- in वर्त. प्र. पु ए. व. & ब. व. of वृध्- १ ग. आ. प. to grow, increase, rise & प्रवर्धते- वर्त. प्र. पु ए. व. of प्र+ वृध्- to increase very much, तनुः- body- in पु. लिं. प्र. वि.. ए. व., वीर्यम्- strength, virility, energy- in न. लिं. प्र. वि. ए. व., मांसम् & मांसात्- in in न. लिं. प्र. वि. & पं वि. ए. व. of मांसम्- flesh, meat

**अन्तर्गतमलो दुष्टस्तीर्थस्नानशतैरपि।**
**न शुध्यति यथा भाण्डं सुराया दाहितं च यत्**॥२६०॥ -चाणक्यनीतिदर्पण अ. ११ श्लो. ७
पा.भे. यत्=सत्

यथा सुरायाः भाण्डम् दाहितम् च यत् (सत्) अपि न शुध्यति, (तथा) अन्तर्गतमलः दुष्टः तीर्थस्नानशतैः (अपि न शुध्यति)॥

Just like a vessel used for storing spiritous liquor does not get fully purified even after it is burnt in a fire, a person whose mind is internally corrupted cannot be purified even after having a hundred purificatory holy baths.

सुरायाः- in स्त्री. लिं. ष. वि. ए. व. of सुरा- spirituous liquor, wine, भाण्डम्- a vessel, pot, utensil, दाहितम्- having burnt- दाहित- प्रयोजक क. भू. धा. वि. of दह्- दाहयति- ते caused to get burnt- (दह्- दहति १ ग. प. प. to burn, scorch, यत्- which, सत्- being, having- कर्तरि वर्त. का. वा. धा. सा वि. of अस्- अस्ति २ ग. प. प. to be, to exist- all in न. लिं. प्र. वि. ए. व., शुध्यति- वर्त. प्र. पु. ए. व. of शुध्- ४. ग. प. प. to be pure, purified, अन्तर्गतमलः- अन्तर्- अव्यय- inside, internally, in the mind, within- used adverbially with गम्- गच्छति १ ग. प. प. to go- गत- क. भू. धा. वि. of गम्- gone, situated, seated in- अन्तर्गतम्- deeply situated in mind, मलम्- filth, impurity, feces- अन्तर्गतम् मलम् - अन्तर्गतमलः- कर्मधारय स. & दुष्टः- a wicked, depraved, corrupted, person- दुष्ट- क. भू. धा. वि. of दुष्- दुष्यति ४ ग. प. प. to be bad, defiled, wicked- both in पु. लिं. प्र. वि. ए. व., तीर्थस्नानशतैः- in न. लिं. तृ. वि. ब. व. of तीर्थस्नानशतम्- holy (purification)- baths at hundred places- तीर्थ- a holy place place of pilgrimage, स्नानम्- न. लिं.- bath, शतम्- hundred, तीर्थे स्नानम्- तीर्थस्नानम्- स. तत्पुरुष स. & तीर्थस्नानानि

शतम्- तीर्थस्नानशतम्- संख्याबहुव्रीहि स., यथा- in which way, manner, like which, अपि- also, even, न- no, not, च- and- all अव्ययs

**देयं भोज्यधनं सदा सुकृतिभिर्नो सञ्चितव्यं कदा**
**श्रीकर्णस्य बलेश्च विक्रमपतेरद्यापि कीर्तिः स्थिता।**
**अस्माकं मधुदानभोगरहितं नष्टं चिरात्सञ्चितं**
**निर्वाणादिति पाणिपादयुगले धर्षन्त्यहो मक्षिकाः** ॥२६१॥ - चाणक्यनीतिदर्पण अ. ११ श्लो. १८
पा. भे.: सञ्चितव्यं कदा = सञ्चयस्तस्य वै & पाणिपादयुगले = नैजपादयुगलं

(मनुष्येण) सुकृतिभिः भोज्यधनम् सदा देयम्, नो कदा सञ्चितव्यम् । श्रीकर्णस्य, बलेः, विक्रमपतेः च अद्य अपि कीर्तिः स्थिता (भवति)। अहो, 'अस्माकम् मधु-दान-भोग-रहितम्, चिरात् सञ्चितम्, नष्टम्' इति मक्षिकाः निर्वाणात् पाणिपादयुगले /नैजपादयुगलम् धर्षन्ति॥

One should always give virtuous people money for enjoying food. It should never be just stored. (Look,) the fame of great Karna, Bali Chakravarti and King Vikramaditya is recounted even to this day! On the other hand, honey-bees keep striking their own pairs of hands and feet in despair, yelling, 'Oh, the honey which we collected and stored for a long time, without ever giving it or enjoying it ourselves, is totally lost !'

सुकृतिभिः- in पु. लि. तृ. वि. ब. व. of सुकृतिन्- one who is righteous, pious, virtuous- सु-अव्यय- prefix denotes good, virtuous- कृतिः- स्त्री. लिं.- doing, deed, work- सुभगा कृतिः यस्य सः- बहुव्रीहि स., देयम्- ought to be given & सञ्चितव्यम्- to be hoarded, accumulated- both in न. लि. प्र. वि. ए. व.- देय (also दातव्य & दानीय) & सञ्चितव्य (also सञ्चयनीय & सञ्चित्य)- both in क. वि. धा. सा. वि. of दा- ददाति- दत्ते ३ ग. उ. प. प. to give, grant, donate & सं+ चि- to collect, gather (चि- चिनोति चिनुते ५ ग. उ. प.), भोज्यधनम्- money for the food/ daily needs, enjoyment- भोज्य- that to be eaten, enjoyed- in क. वि. धा. सा. वि. of भुज्- भुनक्ति भुंक्ते ७ ग. उ. प. to eat, enjoy, धनम्- money, wealth- भोज्यम् धनम्- वि. पू. प. कर्मधारय स., श्रीकर्णस्य, बलेः विक्रमपतेः- all in पु. लिं. ष. वि. ए. व. of श्रीकर्णः- Karna of Mahabharat, बलिः- Demon king Bali, विक्रमपतिः- King Vikramadiya, कीर्तिः- fame, name, glory & स्थिता- remained- स्थित- क. भू. धा. वि. of स्था- तिष्ठति १ ग. प. प. to stay, remain)- both in स्त्री. लिं. प्र. वि. ए. व., अस्माकम्- ours- in ष. वि. ब. व. of अस्मद्- I, मधुदानभोगरहितम्- honey that was not given, nor enjoyed- मधु- न. लिं.- honey, दान- granting, giving, charity, भोग- enjoying, using, रहितम्- devoid of, without- रहित- क. भू. धा. वि. of रह्- रहति १ ग. प. प. to quit, leave, दानम् च भोगः च- दानभोगः- द्वंद्व स. & दानभोगेन रहितम्- तृ. तत्पुरुष स., चिरात् & निर्वाणात्- both पं. वि. ए. व. of चिर- adjctv- long-time & निर्वाण- lost, complete extinction- क. भू. धा. वि. of निस्+ वा- to be lost, extinct- (वा- वाति २ ग. प. प. to blow, to go), सञ्चितम्- collected, gathered- सञ्चित- क. भू. धा. वि. of सं+ चि- to collect- see above, नष्टम्- lost, ruined- नष्ट- क. भू. धा. वि. of नश्- नश्यति ४ ग. प. प. to be lost, मक्षिकाः- in स्त्री. लिं प्र. वि. ब. व. of मक्षिका- bee (honey bee), पाणिपादयुगले- in न. लिं. द्वि. वि. द्वि. व. of पाणिपादयुगलम्- a pair of hands and feet- पाणिः- पु. लिं- hand, पादः- foot, युगलम्- a pair, couple- पाणौ च पादौ च- पाणिपादौ- द्वंद्व स.- पाणिपादयोः युगलम्- ष. तत्पुरुष स., नैजपादयुगलम्- in न. लिं. द्वि. वि. ए. व.- one's own pair of feet- निज- one's own- नैज- belonging to one's own- नैजौ पादौ- नैजपादौ- वि. पू. प. कर्मधारय स. & नैजपादयोः युगलम्- ष. तत्पुरुष स., धर्षन्ति- वर्त. प्र. पु. ब. व. of घृष्- घर्षति १ ग. प. प. to strike against, rub, सदा- always, constantly, नो- no, not, कदा- sometimes- नो कदा- never,

इति- a particle used to report very words spoken- thus, so, च-and, अद्य- today, अहो- Oh- a particle denoting surprise, pity regret, अपि- even, also- all अव्ययs

**सानन्दं सदनं सुताश्च सुधियः कान्ता प्रियालापिनी**
**इच्छापूर्तिधनं स्वयोषिति रतिः स्वाज्ञापराः सेवकाः।**
**आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे,**
**साधोः संगमुपासते च सततं धन्यो गृहस्थाश्रमः** ॥२६२॥ -चाणक्यनीतिदर्पण १२.१,

(यस्य) सदनम् सानन्दम्, सुताः च सुधियः, कान्ता प्रियालापिनी (अस्ति), (यत्र) इच्छापूर्तिधनम् {अस्ति}), , (यस्य) रतिः स्वयोषिति (अस्ति), सेवकाः स्वाज्ञापराः (सन्ति), (यस्य) गृहे आतिथ्यम्, शिवपूजनम्, प्रतिदिनम् मिष्टान्नपानम्, सततम् साधोः संगम् उपासते च (तस्य) गृहस्थाश्रमः धन्यः (अस्ति) ॥

(In a life of a householder), the house is full of happiness, the children are intellectuals, the wife (husband) is pleasant speaking, there is enough wealth to meet all wants, there is love for his wife (husband), servants are obedient, good hospitality and daily worship of God are practiced, there are sweet-meals in the house and noble people are honoured. This stage of life of married hopuseholders is indeed blessed!

सदनम्- house, mansion, सानन्दम्- full of joy, happiness- आनन्दः- joy, happiness- आनन्देन सह- तृ तत्पुरुष स., आतिथ्यम्- hospitality, reception, शिवपूजनम्- worship of the God (Shiva)- शिवः- God (Shiva), पूजनम्- worship- शिवस्य पूजनम्- ष. तत्पुरुष स., प्रतिदिनम्- every day- दिनम्- a day, दिने दिने- अव्ययीभाव स., मिष्टान्नपानम्- मिष्ट- adjctv- sweet, अन्नम्- food, पानम्- drinking, eating- मिष्टम् अन्नम्- मिष्टान्नम्-कर्मधारय स a sweet-meat, मिष्टान्नस्य पानम्- ष. तत्पुरुष स., इच्छापूर्तिधनम्- wealth adequate to fulfill all desires- इच्छा- desire, wants & पूर्तिः- fulfilment- both स्त्री. लिं, धनम्- न. लिं- wealth, money- इच्छायाः पूर्तिः- इच्छापूर्तिः- ष. तत्पुरुष स., संगम्- association, company & इच्छापूर्तये धनम्- इच्छापूर्तिधनम्- चतुर्थी तत्पुरुष स., सन्मित्रम्- noble friend- सत्- good noble, मित्रम्- friend- वि. पू. प. कर्मधारय स., सधनम्- a wealthy, one with wealth- धनेन सह- सहबहुव्रीहि स.- all in न. लिं. प्र. वि. ए. व., सुताः, सुधियः, सेवकाः, स्वाज्ञापराः,- all in पु. लिं. प्र. वि. ब. व. of सुतः- son, सुधीः- धीः- स्त्री. लिं- intellect, understanding, सु- अव्यय- prefix implies good, great- सुभगा धीः यस्य सः- सुधीः- ष. तत्पुरुष स., सेवकः- servant, स्वाज्ञापरः- obedient to one's command- स्व- one's own, आज्ञा- command, order, परम्- very much, in high degree, in line with- स्वस्य आज्ञा- स्वाज्ञा- ष. तत्पुरुष स. & स्वाज्ञासु परः यः सः- बहुव्रीहि स., कान्ता- wife, beloved & प्रियालापिनी- प्रिय- adjctv- likable, sweet, आलापिनी- talking, speaking- प्रिया आलापिनी इति- प्रियालापिनी (प्रियालापिन्)- कर्मधारय स. & रतिः- love, affection- all in स्त्री. लिं. प्र. वि. ए. व., स्वयोषिति- in स्त्री. लिं. स. वि. ए. व. of स्वयोषित्- one's own woman, wife- स्व- one's own, योषित्- woman, girl wife, साधोः- in पु. लिं. ष. वि. ए. व. of साधुः- a noble, saintly person, उपासते- वर्त. प्र. पु. ए. व. of उप+ आस्- serve, wait upon, worship, गृहे- न. लिं. स. वि. ए. व. of गृहम्- house, धन्यः- fortunate, blessed, lucky & गृहस्थाश्रमः- a life of a householder- गृहम्- house, गृहे तिष्ठति इति- गृहस्थः- a householder- उपपद तत्पुरुष स. & गृहस्थस्य आश्रमः- गृहस्थाश्रमः- ष. तत्पुरुष स.- both in पु. लिं. प्र. वि. ए. व., च-and, सततम्- always, constantly- both अव्ययs

**हस्तौ दानविवर्जितौ श्रुतिपुटौ सारस्वतद्रोहिणौ**
**नेत्रे साधुविलोकनेन रहिते पादौ न तीर्थं गतौ ।**
**अन्यायार्जितवित्तपूर्णमुदरं गर्वेण तुङ्गं शिरो**
**रे रे जम्बुक मुञ्च मुञ्च सहसा नीचं सुनिन्द्यं वपुः** ॥२६३॥ - चाणक्यनीतिदर्पण अ. १२ श्लो. ४

(तव) हस्तौ दानविवर्जितौ, श्रुति- पुटौ सारस्वत- द्रोहिणौ, नेत्रे साधु-विलोकनेन रहिते, पादौ तीर्थम् न गतौ, उदरम् अन्यायार्जित- वित्त-पूर्णम्, शिरः गर्वेण तुङ्गम् (अस्ति)। रे रे जम्बुक! (त्वम् एतादृशम्) नीचम् सुनिन्द्यम् वपुः सहसा मुञ्च, मुञ्च॥

Your hands are bereft of any charity. Your ears hate listening to scriptures. Your eyes are blind to see virtuous people. Your feet have not visited any holy places. Your stomach is brimming with wealth acquired by unjust means. Your head is held high with all arrogance. Oh, oh, you mean person! Get rid of your mean, extremely disgraceful body immediately!

जम्बुक- in पु. लिं. सं वि. ए. व. of जम्बुकः- a jackal, a mean person, हस्तौ, दानविवर्जितौ, श्रुतिपुटौ, सारस्वतद्रोहिणौ, पादौ & गतौ- all in पु. लिं. प्र. वि. द्वि. व. of हस्तः- hand, दानविवर्जितः- one deprived of any acts of charity- दानम्- giving, charity, विवर्जित- devoid of, deprived of, without- क. भू. धा. वि. of वि+ वृज्- to shun, deprive of (वृज्- वर्जति १ ग. प. प. to shun)- दानेन विवर्जितः- तृ. तत्पुरुष स., श्रुतिपुटः- fold of an ear- श्रुतिः- स्त्री. लिं- ear, hearing, पुटः- fold, cavity, space- श्रुतेः पुटः- ष. तत्पुरुष स., सारस्वतद्रोहिन्- one who hates people connected with learning, knowledge- सारस्वत- adjctv- relating to goddess Saraswati- literature, knowledge द्रोहिन्- hater, assailer- सारस्वतत्स्य द्रोहिन् इति- सारस्वतद्रोहिन्- ष. तत्पुरुष स., पादः- foot & गतः- gone, visited- क. भू. धा. वि. of, नेत्रे & रहिते- both in न. लिं. प्र. वि. द्वि. व. of नेत्रम्- an eye, eye sight, रहितम्- devoid of, deprived of- रहित- क. भू. धा. वि. of रह्- रहति १ ग. प. प. to leave, abandon, उदरम्- stomach, belly, अन्यायार्जितवित्तपूर्णम्- stomach is brimming with wealth that is acquired by unjust means- अन्याय- adjctv- unjust, improper अर्जित- earned- क. भू. धा. वि. of अर्ज्- अर्जति १ ग. प. प. to procure, gain, वित्तम्- wealth- वित्त- क. भू. धा. वि. of विद्- विन्दति -ते ६ ग. उ. प. to gain, acquire, पूर्णम्- full, filled- पूर्ण- क. भू. धा. वि. of पूर्- पूर्यते ४ ग. आ. प. to fill- अन्यायेन अर्जितम्- अन्यायार्जितम्- तृ. तत्पुरुष स., अन्यायार्जितम् वित्तम्- अन्यायार्जितवित्तम्- वि. पू. प. कर्मधारय स., अन्यायार्जितवित्तेन पूर्णम्- तृ. तत्पुरुष स. & अन्यायार्जितवित्तपूर्णम् उदरम्- वि. पू. प. कर्मधारय स., शिरः (शिरस्)- head & तुङ्गम्- adjctv- lofty, high, elevated- all in न. लिं. प्र. वि. ए. व., नीचम्- mean low, सुनिन्द्यम्- very disgraceful- सु- अव्यय- prefix denotes very, highly- निन्द्य- disgraceful, forbidden, vile- निन्द्य (also निन्दितव्य & निन्दनीय)- क. वि. धा. सा. वि. of निन्द्- निन्दति-१ ग. प. प. to blame, censure- सुतराम् निन्द्य- सुनिन्द्यम्- प्रादि कर्मधारय स., वपुः (वपुस्)- body, तीर्थम्- holy place, pilgrimage centre- all in न. लिं. द्वि. वि. ए. व., साधुविलोकनेन & गर्वेण- both in तृ. वि. ए. व. of साधुविलोकनम्- seeing virtuous or righteous things/person- साधु- adjctv- noble, saintly, virtuous, विलोकनम्- seeing, sighting, looking at- साधोः विलोकनम्- ष. तत्पुरुष स., मुञ्च- आज्ञार्थ म. पु. ए. व. of मुञ्च्- मुञ्चति- ते ६ ग. उ. प. to set free, release, let go, रे- a vocative particle- Oh, न- no, not & सहसा- at once, immediately, inconsiderately- all अव्ययs

**सत्सङ्गाद्भवति हि साधुता खलानां**
**साधूनां नहि खलसंगतः खलत्वम्।**

**आमोदं कुसुमभवं मृदेव धत्ते**
**मृद्गन्धं नहि कुसुमानि धारयन्ति॥**२६४॥ - चाणक्यनीतिदर्पण अ. १२ श्लो. ७

सत्सङ्गात् खलानाम् हि साधुता भवति। खलसङ्गतः साधूनाम् खलत्वम् न हि (यति)। कुसुम- भवम् आमोदम् मृद् एव धत्ते, न हि कुसुमानि मृद्गन्धम् धारयन्ति॥

From the company of noble people, wicked men indeed acquire good behaviour. By association with wicked people, noble men never become wicked. The soil acquires fragrance of the flowers sprung from it, but the flowers do not carry the smell of the soil.

सत्सङ्गात् & खलसङ्गतः (खलसङ्गात्)- both in पु. लिं. पं. वि. ए. व. of सत्सङ्गः- सत्- noble, saintly, सङ्गः- association, company, coming together- सताम् सङ्गः & खलसङ्गः- खलः- a wicked, bad person- खलानाम् सङ्गः- both ष. तत्पुरुष स., खलानाम् & साधूनाम्- both in पु. लिं. ष. वि. ब. व. of खलः & साधु- noble, saintly, साधुता- saintliness, decency, good behaviour & खलत्वम्- wickedness, cruelty- ता- & त्वम्- suffix implies quality, nature, भवति & धत्ते- both in वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, become & धा- दधाति- धत्ते ३ ग. उ. प. to bear, carry, कुसुमानि- in न. लिं. प्र. वि. ब. व. of कुसुमम्- a flower, कुसुमभवम्- originated from the flowers- कुसुमात् भवति इति- उपपद तत्पुरुष स., आमोदम्- fragrance, perfume, joy, delight & मृद्गन्धम्- smell of the earth- all in न. लिं. द्वि. वि. ए. व., धारयन्ति- in-प्रयोजक वर्त. प्र. पु. ब. व. प. प of धृ- १ ग. उ. प. (धृ- धरति /धरते- to bear, carry, hold), न- no, not, हि- surely, certainly, indeed, एव- just, only merely- all अव्ययs

**येषां श्रीमद्यशोदासुतपदकमले नास्ति भक्तिर्नराणां**
**येषामाभीरकन्याप्रियगुणकथने नानुरक्ता रसज्ञा ।**
**येषां श्रीकृष्णलीलाललितरसकथासादरौ नैव कर्णौ**
**धिक् तान् धिक् तान् धिगेतान् कथयति सततं कीर्तनस्थो मृदङ्गः** ॥२६५॥ -चाणक्यनीतिदर्पण १२.५

येषाम् नराणाम् श्रीमद्-यशोदा-सुत-पद-कमले भक्तिः न अस्ति, येषाम् रसज्ञा आभीर-कन्या-प्रिय-गुण-कथने अनुरक्ता न (अस्ति), येषाम् कर्णौ श्रीकृष्ण-लीला-ललित-रस- कथा- सादरौ न एव (स्तः), धिक् तान् धिक् तान्, धिक् एतान् (इति) कीर्तनस्थः मृदङ्गः सततम् कथयति॥

For the men who have no devotion to the lotus feet of the child of gracious Yashoda, whose taste is not loyally devoted to singing in praise the virtues of beloved of cowherd girls and those whose ears are not just respectful to the narration of tastefully pleasing playful sports of Lord Shrikrishna, the 'Mrudanga' present at the recital of Lord's stories, keeps constantly sounding, 'धिक् तान् धिक् तान्, धिक् एतान्'. (Shame to them, Shame to them, Shame to all of them)

येषाम् & नराणाम्- both in पु. लिं. ष. वि. ब. व. of यद्- who & नरः- person, man, श्रीमद्यशोदासुतपदकमले & आभीरकन्याप्रियगुणकथने- both in न. लिं. स. वि. ए. व. of श्रीमद्यशोदासुतपदकमलम्- Lotus feet of child of gracious Yashoda- श्रीमत्- adjctv- virtuous, graceful, यशोदा- Yashoda, सुत- son, पदः- foot, कमलम्- lotus- श्रीमत् (श्रीमती) यशोदा- श्रीमद्यशोदा- वि. पू. प., पदौ कमले इव- पदकमलम्- उपमा उ. प. कर्मधारय स., श्रीमद्यशोदायाः सुतः- श्रीमद्यशोदासुतः & श्रीमद्यशोदासुतस्य पदकमलम्- both ष तत्पुरुष स.,

आभीरकन्याप्रियगुणकथनम्- singing praise of virtues of beloved of cowherd girls- आभीर- cowherd, कन्या- girl, प्रिय- beloved, dear, गुण- virtue, कथनम्- singing praise- आभीरस्य कन्या- आभीरकन्या, आभीरकन्यानाम् प्रियः- आभीरकन्याप्रियः, आभीरकन्याप्रियस्य गुणस्य कथनम्- ष. तत्पुरुष स., भक्तिः- devotion, reverence, रसज्ञा- tongue- रसः- taste,, flavour, ज्ञ- adjctv- knowing- रसम् जानाति - उपपद तत्पु.स., न अस्ति, अनुरक्ता- loyally devoted- अनुरक्त- क. भू. धा. वि. of अनु+ रंज्- (रंज्- रजति- ते १ ग. उ. प. to be attached, devoted), कर्णौ & श्रीकृष्णलीलाललितरसकथासादरौ- both in पु. लिं. प्र. वि. द्वि. व. of कर्णः- an ear & श्रीकृष्णलीलाललितरसकथासादरः- one who is respectful to narration of tastefully pleasing playful sports of Lord Shrikrishna- श्रीकृष्ण- lord Krishna, लीला- playful sport, ललित- elegant, pleasing, रस- taste, Rasa- expression of sentiment- कथा- story आदरः- reverence- आदरेण सह- सादरः- सहबहुव्रीहि स.- ललितः रसः- ललितरसः- वि. पू. प. कर्मधारय स. & श्रीकृष्णस्य लीलायाः ललितरसस्य कथायाः सादरः - कर्मधारय स., तान् & एतान्- both in पु. लिं. द्वि. वि. ब. व. of तद्- he, it, that & एतद्- this one, कीर्तनस्थः- one present at recital of stories- कीर्तनम्- recital of stories (in praise of God)- कीर्तने तिष्ठति इति -उपपद & मृदङ्गः- a type of drum- both in पु. लिं. प्र. वि. ए. व., कथयति- वर्त. प्र. पु. ए. व. of कथ्- १० ग. उ. प. to tell, declare, न- no, not, एव- just, only, mere, धिक्- an interjection of censure, displeasure & सततम्- always, constantly- all अव्ययs

**विप्रास्मिन्नगरे महान्कथय कस्तालद्रुमाणां गणः**
**को दाता रजको ददाति वसनं प्रातर्गृहीत्वा निशि**
**को दक्षः परवित्तदारहरणे सर्वोऽपि दक्षो जनः**
**कस्माज्जीवसि हेसखे विषकृमिन्यायेन जीवाम्यहम्**॥२६६॥ -चाणक्यनीतिदर्पण अ.१२ श्लो. ९

विप्र, अस्मिन् नगरे कः महान् कथय- 'ताल- द्रुमाणाम् गणः'। कः दाता?- 'रजकः, प्रातः वसनम् गृहीत्वा, निशि ददाति'। को दक्षः?- 'परवित्तदारहरणे सर्व: अपि जनः दक्षः (अस्ति)' । हे सखे, कस्मात् जीवसि? 'अहम् विषकृमिन्यायेन जीवामि'॥

(Here each line starts with a question and is followed by its answer)

Oh, Learned-man, tell me who is great? - 'A Cluster of Palmyra trees alone is great'.
Who is the giver? - 'The Washerman, who collects clothes in the morning and gives them back at night'.
Who is very attentive? - 'All people who are very prompt in snatching away other's wealth and women'.
Then, oh dear friend, then how at all you survive? - 'I survive by the maxim of a worm in a poisonous environment'.

विप्र & सखे- both in पु. लिं. सं. वि. ए. व. of विप्रः- a member of priestly class, a learned person & सखा- friend, buddy, अस्मिन्, नगरे & परवित्तदारहरणे- all in पु/न. लिं. स. वि. ए. व. of इदम्- this, नगरम्- town, city & परवित्तदारहरणम्- seizing of wealth and women of others- परः- other, another, वित्तम्- wealth, दारा- पु. लिं.- wife, हरणम्- taking away, snatching- वित्तम् च दारा च- वित्तदारा- द्वंद्व स. & परस्य वित्तदाराणाम् हरणम्- ष. तत्पुरुष स., निशि- in स्त्री. लिं. स. वि. ए. व. of निश्- night, कः (किम्)- who, महान् (महत्)- adjctv- great, big, गणः- group, कः (किम्)- who, दाता, (दातृ)- a philanthropist, giver, रजकः- a washerman, दक्षः- prompt, attentive, fit, suitable careful, सर्व:-all, entire, जनः-

people- all in पु. लिं. प्र. वि. ए. व., अहम्- I- प्र. वि. ए. व.of अस्मद्, कथय- आज्ञार्थ म. पु. ए. व. of कथ्- कथयति- ते १० ग. उ. प. to tell, say, तालद्रुमाणाम्- in पु. लिं. ष. वि. ब. व. of तालद्रुमः- a Palmyra tree- तालः- a Palmyra tree, द्रुमः- tree- तालस्य द्रुमः- ष. तत्पुरुष स., वसनम्- clothes- न. लिं. द्वि. वि. ए. व., गृहीत्वा- पू. का. वा. त्वान्त धा. सा. अव्यय of ग्रह्- गृह्णाति गृह्णीते ९ ग. उ. प.- to receive, take, ददाति- (दत्ते)- वर्त. प्र. पु. ए. व. of दा- ३ ग. उ. प. to give, कस्मात्- by what, which- in पु/न. लिं. पं. वि. ए. व. of कः/किम्- who, विषकृमिन्यायेन- in पु. लिं. तृ. वि. ए. व. of विषकृमिन्यायः- the maxim of survival of a worm or a insect in a poisonous environment- विषम्- poison, कृमिः- worm, insect, न्यायः- logic, system, rule, method- विषम् च कृमिः च- विषकृमिः- द्वंद्व स. & विषकृम्योः न्यायः- ष. तत्पुरुष स., जीवामि & जीवसि- वर्त. उ. पु. & म. पु. ए. व. of जीव्- जीवति १ ग. प. प. to live, to be alive, प्रातः (प्रातर्)- at dawn, day break, हे- particle of addressing, अपि-also, even- all अव्यय‍s